मल्लिनाथमनीषा

(A collection of Papers presented at the Seminar on Mallinatha, held on 22nd & 23rd September, 1979, in the Department of Sanskrit, Osmania University.)

Edited by

Dr. P. G. Lalye,
Head, Dept. of Sanskrit,
O. U. Hyderabad

Department of Sanskrit
Osmania University,
Hyderabad-500007.

1981

MALLINATHAMANISA
First Edition 1981.

Copies : 300

Price : Rupees Thirty only.

Published by :
Dr. P. G. Lalye,
Head, Dept of Sanskrit
O. U. Hyderabad

Printed at :
Shree Santosh Printing Press,
Badi Chawdi, Sultan Bazar,
Hyderabad (A. P.)

Preface

It gives me immense pleasure to present MALLINATHA MANJUSA to the scholars. This book contains papers read at the Seminar on Mallinatha held on 22nd and 23rd Sept. 1979, under the aegis of the Department of Sanskrit, Osmania University. The Diamond Jubilee of Osmania University was celebrated in 1978–79. The seminar on Mallinatha was held as part and parcel of those celebrations. These papers, I hope, may fulfill, though partially, a long-felt need of a comprehensive study of Mallinatha's commentaries. Mallinatha was a resident of Kolachalam (Dist. Medak, Andhra Pradesh) and it was in the fitness of things that the first-ever seminar on Mallinatha was held at Hyderabad. I apologize tothe scholars for bringing this book out with a little delay. Prof. B. R. Sastry, the then Head of the Sanskrit Department, Osmania University, had done a commendable ground work earlier. Later I took up the work as Head of the Department. Thanks to the very valuable co-operation extended by my colleagues, the seminar went on very punctually and smoothly. The scholar critics should decide the value of this work as

आ परितोषा द्विदुषां न साधु मन्ये प्रयोगविज्ञानम् ।

I take this opportunity to express our gratitude to Prof. G. Ram Reddy, Vice-Chancellor, Osmania University and to Prof V. A. Shahane, Chairman, Diamond Jubilee Committee, for kindly sanctioning Rs. 5000/- for the seminar. I extend my heart felt thanks to the Secretary, Andhra Pradesh Sahitya Academy, Hyderabad for kindly donating Rs. 2000/- for the seminar. I also extend sincere thanks to the Director, Sanskrit Academy, for contributing Rs. 1000. On behalf of the Sanskrit Department, I express sincere thanks to all the scholars who took the troubles of coming over to

Hyderabad and present their learned papers at the seminar. I am indebted to all my colleagues and especially to Dr. P. Sriramachandrudu, Reader in Sanskrit, Osmania University for rendering valuable assistance in editing this book My thanks are also due to Sri C. V. Seshacharyulu for going through the proofs indefatiguably.

Hyderabad,
3-9-1981.

Dr. P. G LALYE
Head, Dept. of Sanskrit,
Osmania University.

यद्वाणी कविकालिदासकवितासौन्दर्यसंजीविनी
काव्यश्रीफलभेदकर्मकृतिनी या भारवेर्भारती ।
या माघस्य मनीषिगम्यवचसां सर्वङ्कषाख्यायिनी
श्रीहर्षस्य च विद्वदौषधवचःसारार्थसंज्ञापिनी ॥
यश्चाप्याकलयन् कवीश्वरगिरां सर्वं रहस्यं सुधी-
र्यःकाव्यार्थसमस्तशास्त्रकुशले वाग्मी कवीनां कविः ।
नीतिज्ञः पदवाक्यशास्त्रनिपुणो यो वेदवेदान्तवि-
च्छ्रीकोलाचलमल्लिनाथमतिमन्मल्लाय तस्मै नमः ॥

—नलिनी साधले

CONTENTS

मल्लिनाथस्य वेदवैदुष्यम्

—सन्निधानं लक्ष्मीनारायणमूर्तिः
"साङ्गस्वाध्यायभास्करः" "मीमांसाविद्याप्रवीणः"

इयमिदानीं अस्मद्देशे अतीव विचित्रा वैज्ञानिकदृष्ट्या शोचनीया च काचन परिस्थितिः अनुभूयते यदद्यत्वे वेदशास्त्रयोः पाण्डित्यं भ्रातृभिः अविभक्त रिक्थमिव प्रायः असमानाधिकरणमिवाभिलक्ष्यते। अष्टाभिर्विकृतिभिस्साकं वेदमधीतवतामप्यनेकेषां मास्तु नाम शास्त्रकौशलं, केवलमकारान्तोऽपि रामशब्दः प्राणान्तायते। नैवेषु शास्त्रेषु निष्णाता अपि बहवः अस्तु नाम आरादेव वेदस्य कथा, अन्ततः; सन्ध्यामन्त्रानपि सस्वरमुच्चारयितुं न पारयन्ति।

वस्तुतस्तु "स्वाध्यायोऽध्येतव्यः" इत्यध्ययनविध्यनुरोधेन फलवदर्थावबोधोपयिकं, अर्थात्—साङ्गोपाङ्गमेव स्वाध्यायमध्येतव्यं मन्यन्ते मीमांसकाः। अध्ययनविधेः वेदाक्षरग्रहणमात्रोपक्षीणतां व्याचक्षाणा अपि, "ज्ञेय" श्चेति पृथग्वचनबलात् अङ्गादीनामप्यध्ययनं विध्युपात्तमुपपादयन्ति उत्तरमीमांसकाः।

तदिह मल्लिनाथः महोपाध्यायपदमादधानः न केवलं सर्वशास्त्रज्ञः, नाऽपि कलामात्रकुशलः, आसीत्, आम्नायेष्यस्याप्रतिहतं पाण्डित्यमासीत्- अर्थात्- अयं सर्वतन्त्रस्वतन्त्र इत्युक्तौ नात्र संशयः विस्मयो वा सहृदयैर्विधेयः। महानुभावानां मल्लिनाथादीनां पाण्डित्यं परिच्छेत्तुं अद्यतनानां अल्पसाराणामस्माकं पाण्डित्यं मानदण्डतया परिग्रहं नार्हति।

तदिह तदीयं वेदवैदुष्यमधिकृत्य किञ्चिन्निवेद्यते—

I. तत्र रघुवंशसञ्जीविन्यां प्रथमसर्गस्य त्रयस्त्रिंशत्तमे-

"तस्य मात्मानुरूपायामात्मजन्मसमुत्सुकः ।
विलम्बितफलैः कालं स निनाय मनोरथैः ॥ (१-३३)

इत्यस्मिन् श्लोके "आत्मजन्मपदं प्रथमं पुत्रपर्यायतया व्याख्याय, 'यद्वा' इत्यादिना "आत्मनो जन्मनि = पुत्ररूपेणोत्पत्तौ समुत्सुकस्सन्" इत्यर्थान्तरपरतया व्याकुर्वन् पितुरेव पत्न्यां पुत्ररूपेण उत्पत्तिमुपपादयितुं एकाग्निकांडगतं–

"अङ्गादङ्गात्संभवसि हृदयादधिजायसे ।
आत्मा वै पुत्र नामासि स जीव शरदश्शतम् ॥"

इति मन्त्रमप्युदाजहार ।

II तत्रैव एकोनपञ्चाशत्तमे श्लोके–

"वनान्तरादुपावृत्तैः समित्कुशफलाहरैः ।
पूर्यमाणमदृश्याग्निप्रत्युद्यातैस्तपस्विभिः ॥" (१-४९)

इत्यत्र अग्नीनां प्रत्युद्यानं विवृण्वन् मल्लिनाथः 'प्रोष्य–आगच्छतां आहिताग्नीनां अग्निप्रत्युद्यानं श्रुतिप्रसिद्धं" इत्याह- समर्थितश्चायमर्थस्सोदाहरणं आपस्तंबमहर्षिणा श्रौतसूत्रे, यथा :–

"यथा ह वा इतं पितरं प्रोषिवांसं पुत्राः प्रत्याधावन्ति एवं ह वा एतमग्नयः प्रत्याधावन्ति । स शकलान् दारूणि वाऽऽहरन्नेति, यथैव तत्पुत्रेभ्य आहरन्नेति तादृक्तदिति विज्ञायते" इति ।

न ह्यनधिगतश्रौतसंप्रदायरहस्याः एवं जातीयकमर्थं समर्थयितुं प्रभवन्ति ।

III. तत्रैव द्वितीयसर्गप्रथमश्लोकव्याख्यायां "जायाप्रतिग्राहितगन्धमाल्यामिति" समस्तपदं यद्यपि "जायया = भार्यया सुदक्षिणया प्रतिग्राहिते" इत्येवंरीत्या साधारणतया व्याख्याय समापयितुं शक्यं, परन्तु "पतिर्जायां प्रविशति गर्भो भूत्वा स मातरम् । तस्यां पुनर्नवो भूत्वा दशमे मासि जायते । तज्जाया भवति यदस्यां जायते पुनः"

इति जायापदनिरुक्तिपरश्रुत्युदाहरणपूर्वकं "जायापदसामर्थ्यात् सुदक्षिणायाः पुत्रजननयोग्यत्वमस्तीति सूचित" मित्यभिदधानः मल्लिनाथसुधीः श्रुतिमर्यादानुविधायि कविहृदयं यथावदाविश्चकार ।

IV. तत्रैव नवमसर्गे–

"अजिनदण्डभृतं कुशमेखलां यतगिरं मृगशृङ्गपरिग्रहम्
अधिवसस्तनुमध्वरदीक्षितामसमभासमभासयदीश्वरः ॥"

(९-२१)

इति दशरथस्य आश्वमेधिकदीक्षावर्णनपरं पद्यं विवृण्वन्

"कृष्णाजिनेन दीक्षयति......ब्रह्मणैवैनं दीक्षयति"

"यद्दीक्षितदण्डं प्रयच्छति वाचमेवावरुन्ध......अर्जा भुञ्जते"

"ऊर्ध्वं वै पुरुषस्य नाभ्यै मेध्य......मेखलया यजमानं दीक्षयति"

"वाचं यच्छति यज्ञस्य धृत्यै"

"इन्द्रस्य योनिरसि मामाहिंसीरिति कृष्णविषाणां प्रयच्छति–
–कृष्णविषाणया कण्डूयते ।

इत्थमेकैकमपि विशेषण श्रुतिप्रमाणोदाहरणेन समुपबृंहयति स्म ।

V. तत्रैव प्रकरणे

"कनकयूपसमुच्छ्रयशोभिनो वितमसा तमसासरयूतटाः (९-१०)
इति कालिदासोक्तं यूपानां कनकमयत्त्वं प्रकृत्य अभिदधे मल्लिनाथः–

"कनकमयत्वं च यूपानां शोभार्थं; विध्यभावत्" इति । शोभार्थं प्रशंसार्थमित्यर्थः । श्रूयन्ते हि शतशो वेदे विधेयप्रशंसार्थाः गुणवादाः, "आदित्यो यूपः इत्यादयः" । यथा आज्यलिप्ततया तेजस्वित्वगुणयोगादादित्यत्वमुच्यते यूपस्य तद्वदत्र कनकमयत्व कविरवादीदिति मन्तव्यम् । किं निबन्धना क्लिष्टकल्पनेऽयं? का हानिः वस्तुत एव कनकमयत्वे यूपानां? इतिचेत् "विध्यभावादित्येव मल्लिनाथस्य समाधानम् । इत्थं निर्विचिकित्सं धीरं धीरमभिधातुं अभिहितमर्थं समर्थयितुं वा मल्लिनाथ

सदृशा: मथितवेदपारावारा: कतिपये महानुभावा एव प्रभवन्ति, न परे पल्लवग्राहिपाण्डित्योपजीविन: । अयमाशयः- यूपस्वरूपमित्थं प्रत्यक्ष वेदे श्रूयते-

"बैल्वो वा खादिरो वा पालाशो वा । अन्येषां यज्ञक्रतूनां यूपा भवन्ति । राज्जुदाल एकविंशत्यरत्निरश्वमेधस्य" इति । क्वचित् विकृति विशेषे सोमापौष्णादौ ।"औदुम्बरो यूपो भवति" इति च.

यद्यपि केचिदाचक्षीरन्- महाकविना कालिदासेनाभिहितत्वात् तदन्यथानुपपत्त्या यूपानां कनकमयत्व यथाश्रुतमेवोपादेयम् । यद्यीदमुप लभ्यमाने वेदे नोपलभ्यते, अस्तु नाम तदा प्रलीनवेदशाखामूलकत्वमस्य । सति चैवं "विध्यभावात्" इति प्रत्याख्यानं व्याख्यातुस्साहसिकतामेवा वगमयतीति । परं तदपि निस्सारम् । प्रत्यक्षवेदेन यूपस्य प्रकृतिद्रव्ये खादिरत्वादिरूपेण निर्धारिते, तेनैव नैराकांक्ष्यात् न अर्थापत्तिरनुमान वा तद्विरुद्धं कनकमयत्वादिरूपमर्थान्तरमापादयितुं पारयति; अनाकाङ्क्ष तार्थाभिधानप्रसङ्गात् । न च कनकमयत्वस्य साकाङ्क्षत्वात् तदनुरोधेन तस्य यूपान्वयो भवत्विति वाच्यम्; उभयाकाङ्क्षालक्षणेन प्रबलेन प्रकरणेन विनियोगे कृते, अन्यतराकाङ्क्षालक्षणस्य दुर्बलस्य स्थानस्य अप्रवृत्ततया बाधस्य बलाबलाधिकरणसिद्धत्वात् । कथं नाम तन्नानुरुन्ध्यात् मीमांसकाग्रणीर्मल्लिनाथसुधीमणिः । अय हि "अन्तस्तंत्रमरंस्त" इत्यव अभिज्ञैरभिनन्द्यते ।

VI. तत्रैवैकोनविंशसर्गस्य अष्टाचत्वारिंशत्तमे श्लोके अति कामुकस्य अग्निवर्णस्य राजयक्ष्मरोगग्रस्ततां कथयन् कविरभिधत्ते स्म-

"आमयस्तु रतिरागसंभव:
दक्षशाप इव चन्द्रमक्षिणोत्" इति

कोऽयं दक्षशाप:? स कथं वा चन्द्रमक्षिणोत्? इतीमामध्येतृजन

जिज्ञासामपनिनीषुणा मल्लिनाथेन तद्व्याख्यायामाख्यायि- "दक्षः किल अन्याः स्वकन्या उपेक्ष्य रोहिण्यामेव रममाणं सोमं शशाप । स शापश्चाद्याऽपि क्षयरूपेण तं क्षिणोतीत्युपाख्यायते" इति । तदिदं तैत्तिरीयसंहिता द्वीतीयकाण्डतृतीयप्रश्नपञ्चमानुवाकस्य- तदर्थस्य च स्वभ्यस्ततया सद्यो बुद्ध्यारूढस्य तात्पर्यवर्णनपरमेवेति वयमुत्पश्यामः । तत्र हि एव माम्नायते-

"प्रजापतेस्त्रयस्त्रिंशद्दुहितर आसन्······

······तद्राजयक्ष्मस्य जन्म" । इति ।

VIII. कुमारसंभवसंजीविन्यां प्रथमसर्गस्य सप्तदशश्लोके

"प्रजापतिः कल्पितयज्ञभागं
शैलाधिपत्य
स्वयमन्वतिष्ठत्

इति कालिदासोक्तं हिमवतश्शैलाधिपत्यं यद्यपि ब्रह्माण्डपुराणादि प्रसिद्धं, परन्तु तदीयं कल्पितयज्ञभागत्वं किं प्रमाणकमिति प्रश्नस्योत्तरतया तैत्तिरीयाश्वमेधप्रकरणोक्तं-

"इन्द्राय राज्ञे सूकरो वरुणाय···हिमवतो हस्ती" इति वाक्यमुद्धृत्य दर्शयति स्म मल्लिनाथः । क्वाऽपि कोणे विद्यमानं अनतिप्रसिद्धमिदं वचनं अनधीतवेदेन जनेन स्मर्तुमुदाहर्तुं वा दुश्शकमिति वस्तुस्थितिकथनमेवैतत्

VIII. तत्रैव-

"शुचौ चतुर्णां ज्वलतां हविर्भुजां
शुचिस्मिता मध्यगता सुमध्यमा ।
विजित्य नेत्रप्रतिघातिनीं प्रभां
अनन्यदृष्टिस्सवितारमैक्षत ॥"

इति पञ्चमसर्गीयविंशतितमश्लोके पार्वत्याः पञ्चाग्निमध्यतपश्चरणप्रकारमुपवर्णयन् कालिदासः- "चतसृषु दिक्षु चतुरः

अग्नीन् प्रज्वाल्य, तन्मध्यगता पार्वती अनन्यदृष्टिस्सवितारमैक्षत" इत्य वोचत् । तत्र कथमनग्निभूतेन सवित्रा अग्नीनां पञ्चत्वं सिध्यतीत्या काङ्क्षायां" सवितैव पञ्चमोऽग्निः" "अग्निस्सविता सवितैवाग्निः" इति श्रौतलिङ्गात् इत्यभिधाय. अग्निसवित्रोस्सहावस्थानलक्षणमेकत्व मभिसन्धाय, मल्लिनाथस्समादधे । तमिममर्थं याजुषी श्रुतिरित्थं समर्थयति–

"अग्निं वा वादित्यस्सायं प्रविशति, तस्मादग्निर्दूरा-
न्नक्तं ददृश, उभे हि तेजसी सपद्येते" इति,

"उद्यन्त वा वा दित्यमग्निरनुसमारोहति, तस्माद्धूम
एवाग्नेर्दिवा ददृशे" इति च

IX किरातार्जुनीयस्य एकादशसर्गे इन्द्रार्जुनसंवादान्तर्गतं–

"कथं वा दीयतामर्वाङ्मुनिता धर्मरोधिनी ।
आश्रमानुक्रमः पूर्वैः स्मर्यते न व्यतिक्रमः" (११-७६)

इत्यस्य श्लोकस्य घण्टापथे–

"ब्रह्मचारी भूत्वा गृही भवेत्, गृही भूत्वा वनी भवेत्, वनी भूत्वा प्रव्रजेत् ।"

इति वाजसनेयकश्रुत्युदाहरणेन कविसम्मतं ब्रह्मचर्यादीनां चतु र्णामाश्रमाणां क्रमसमुच्चयपक्षं समर्थ्य, तस्य अनुत्पन्नवैराग्यान् मन्दा धिकारिणोऽधिकृत्य प्रवृत्तत्वमाचार्योक्तमनुसन्दधानः उत्पन्नतीव्रवैरा ग्याणामुत्तमाधिकारिणां कृते आश्रमविकल्पपक्षरूपं विशेषमप्याह–

"यदहरेव विरजेत्तदहरेव प्रव्रजेत्, गृहाद्वा वनाद्वा" इति ।

X. शिशुपालवधस्य द्वितीयसर्गीयैकाशीतितम श्लोके–

"उदेतुमत्यजन्नीहां राजसु द्वादशस्वपि ।
जिगीषुरेको दिनकृदादित्येष्विव कल्पते ॥" (२–८१)

इत्यत्र द्वादशराजमण्डले विजिगीषोरेवाभ्युदय भाक्त्वमुपपादयन्, द्वादशानामादित्यानां मध्ये दिनकृतमादित्यमुपमानीचकार कविः। तद्व्याख्यायां च सर्वङ्कषाख्यायां-" कथमिदमादित्यानां द्वादशत्व? एक एव खल्वादित्यः अस्माकमक्षिगोचरतामुपयाति ? इतीमामाशङ्कां अपाचिकीर्षुः मनीषिप्रवरो मल्लिनाथः प्रथमं– "इन्द्रो धाता भगः पूषा मित्रोऽथ वरुणोर्यमा। आर्चिविवस्वान् त्वष्टा च सविता विष्णुरेव च" इत्येवं पुराणप्रसिद्धैः नामभिः तेषां द्वादशत्वमुक्त्वा तन्नानात्वे उपष्टंभकतया आरुणकेतुकचयनप्रकरणगतां श्रुतिमिमां प्रमाणीचकार–

"नानालिङ्गत्वादृतूनां नानासूर्यत्वम्" इति।

अत्राऽयं प्रकरणार्थः- अस्ति किञ्चिदारुणकेतुकचयनं नाम अबीष्टकासाध्यं आरण्यकश्रुतिप्रसिद्धं कर्म। तदनुष्ठानफलत्वेन प्राप्यं कश्यपाख्यमुख्यसूर्याधिष्ठितं महामेरुस्थानं स्वर्गविशेषमुपदर्शयन्ती श्रुतिः तदुपोद्घाततया सूर्याणां ननात्वं ब्रवीति। तद्यथा-

"आरोगो भ्राजः पटरः पतङ्गः....
कश्यपोष्टमः, स महामेरुं न जहाति" ॥ इति।

अयमाशयः– योयमस्मत्प्रत्यक्षगोचरः, स आरोगाख्यस्सूर्यः तदपेक्षया त्रयस्सूर्याः भ्राजपटरपतङ्गाख्याः मेरुमार्गस्य अधस्तात् सञ्चरन्तः तद्देशान् अवभासयन्ति। स्वर्णरः ज्योतिषीमान् विभासः इत्यतन्नामानस्त्रयः तस्य ऊर्ध्वं परिवर्तमानाः तद्भागान् उद्योतयन्ति। त एते सप्ताऽपि चरस्वभावा एव सूर्याः। स्थिरस्तु कश्यपाख्यः अष्टमः अतिरिक्त एव कश्चित् सूर्यः। स महामेरुं न जहाति। तदनुग्रहेणैव सोमः उक्तान् सप्ताऽपि सूर्यान् आरोगादीन् जगत्प्रकाशनक्षमान् करोति।

ननु एतावतां सूर्याणामस्तित्वे किं मानम्? प्रत्यक्षमिति ब्रूमः। यद्यप्यस्मत्प्रत्यक्षगोचर आरोगाख्यस्सूर्य एक एव, अन्येषामस्माकं आनुश्रविकत्वेऽपि पञ्चकर्णो वात्स्यायनः, सप्तकर्णश्च प्लाक्षिः तान् प्रत्यक्षमपश्यताम्। अष्टमस्तु कश्यपाख्यः तयोरप्यानुश्रविक एव। परन्तु गार्ग्यः प्राणत्रातनामा महर्षिः तमपि प्रत्यक्षमैक्षत। अपिचाऽयमुपदिशति, अन्येषामपि तत्साक्षीकरणसाधनं ऊर्ध्वाधोभागवर्ति सूर्यसन्तापानास्कन्दितं सुख

शीतलं मध्यतनं मेरोः पन्थानम्। एवञ्च प्रत्यक्षप्रमाणप्रमितत्वात् अष्टौ सूर्याः अवश्यमङ्गीकर्तव्या इत्याचष्टे श्रुतिः-

"अष्टौ तु व्यवसिता इति"।

न च एक एवादित्योस्माकं प्रत्यक्षः। अन्येषां तु अतथात्वात्. आनुश्रविकत्वमेव, न प्रत्यक्षत्वमिति वाच्यम्। न हि प्रत्यक्षयोग्यमपि सर्वं सर्वस्य प्रत्यक्षं भवतीत्यास्तां तावत्।

एवमष्टानामादित्यानां प्रत्यक्षप्रमितत्वेऽपि इतोधिकानामपि तेषामस्तित्वं कार्यलिङ्गकानुमानगम्यमित्येव गमयति श्रुतिः। यथा-

"नानालिङ्गत्वादृतूनां नानासूर्यत्वम्" इति।

अय भावः-कार्येण हि कारणमनुमीयते। एवं कार्यनानात्वे कारण नानात्वमपि। यद्येक एव सूर्यस्स्यात् तस्य एकस्वभावत्वात् वसन्तादिषु ऋतुषु विलक्षणानां कार्याणामुपलंभः न स्यात्। उपलभ्यन्ते च फलपुष्पौषाधिविशेषोद्गमप्रभृतीनि, तापवृष्टि- शैत्यादीनि च विलक्षणानि कार्याणि। तदनुरोधेन तत्कारणानां सूर्याणामपि नानात्वं अकामेनाऽपि अवश्यमभ्युपगन्तव्यमिति।

किंबहुना ? अनया च विधया विचार्यमाणे कार्याणामानन्त्यात् अनन्तसूर्यत्वं पर्यवस्यतीति श्रुतिरभिप्रैति। तद्यथा :-

"एतयैवावृताऽऽसहस्रसूर्यताया इति वैशम्पायनः"। अत्रत्यं सहस्र शब्दमानन्त्यार्थकं मन्यन्ते भाष्यकृतः।

XI. नैषधीयचरितस्य चतुर्थसर्गे दमयन्तीकृत चन्द्रोपालंभप्रसङ्गे हृद्यमिदं पद्यमुपनिबबन्ध ग्रन्थकारः श्रीहर्षः।

किमसुभिर्गलितैर्जड मन्यसे मयि निमज्जतु भीमसुतामनः।
मम किल श्रुतिमाह तदर्थिकां नलमुखेन्दुपरां विबुधः स्मरः॥
(४-५२) इति।

हे चन्द्र! जड! त्वमित्थं मन्यसे किं वा यत्- दमयन्ती यावज्जीवति तावत्तदीयं मनः मयि लग्नं न भवति, अतः तां मारयामि, मृतायां

च तस्यां तन्मन· अवश्यं मामुपैष्यति– इति। तत्केवलं त्वदीयजडता प्रयुक्तैव संभावना। यद्यपि श्रुतिःशरीरादपक्रान्तेष्वसुषु मनसः चन्द्रमसि लयं ब्रवीति, परन्तु स चन्द्रः मन्मनोलयाऽलम्बनः न त्वं. किन्तु नलमुख चन्द्र एव। इदं च केवलं न मे आभिमानिकम्। कुतइतिचेत् श्रूयताम्–त्वदीयं हि चन्द्रत्वं गौणम्। मुख्यस्तु नलमुखचन्द्र एव। मुख्यगौणयोर्मुख्ये खलु कार्यसंप्रत्ययं बुधाः प्रत्याययन्ति। विबुधश्च स्मरः इत्थंभूतमेव श्रुत्यर्थं मे समुपादिशत्। अतस्त्वं वृथाप्रत्याशया मां मा बाधिष्ठाः इत्याशयः।

नतावदवेदवित् केवलशास्त्रज्ञः कश्चिदिमं पद्यं यथावद्व्याख्यातुं प रयति। मल्लिनाथसुधीस्तावत् 'जीवातु" समाख्याने तदव्याख्याने– "यत्रास्य पुरुषस्याग्नि वागप्यति वातं प्राणश्चक्षुरादित्यं मनश्चन्द्रं दिश श्रोत्रं पृथिवीग् शरीरमाकाशमात्मौषधीर्लोमानि वनस्पतीन् केशाः अप्सु रोहितं च रेतश्च निधीयते"। इति शुक्लयजुर्वेदीयबृहदारण्यक वचनमुदाहृत्य श्लोकार्थं समर्थयामास। अनेन च अय न केवलं कवेराशय पुष्णाति: अपि तु आत्मीयां अनेक वेदशाखाभिज्ञतामपि अभिद्योतयति। इत्थ मल्लिनाथस्य वेदवैदुष्यप्रख्यापकानि प्रमाणानि तदीयव्याख्यानेषु शतशस्समुपलभ्यन्ते। परंतु लघु– निबन्धमिमं विस्तरदोषान्निस्तारयितुमियता बिरम्यते।

XII. इदं तावदेकं वक्तव्यं-यथाचास्य महाभागस्य वेदपूर्वभागे सर्वतोमुखमखण्डं पाण्डित्यं उपरितनैरुदाहणैरनुमीयते. तद्वत् आत्मयाथात्म्यप्रतिपादनाय प्रवृत्ते उपनिषच्छब्दवाच्ये उत्तरभागेऽपि अनुत्तममस्य विज्ञानमभवदित्यवगम्यते- सञ्जीविन्यां, घण्टापथे, सर्वङ्कषायां, जीवातौ च तत्तत्प्रकरणोदाहृतैः प्रमाणवचनैः। तत्र दिग्दर्शनार्थतया कतिपयान्यत्र निर्दिश्यन्ते। यथा–

रघुवंशसञ्जीविन्याम् :–

"तमेवं विद्वानमृत इह भवति। नान्यः पन्था विद्यतेयनाय"

(१०-२८)

"इदगं् सर्वमसृजत, यदिदं किञ्च" (१०-२८)
"ब्राह्मणाः प्रव्रजन्ति" (८-१४)

कुमारसंभवसञ्जीविन्यां :-

"तमेवं विदित्वातिमृत्युमेति" (२-५१)
"आत्मा वा इदमेक एवाग्र आसीत्" (२-४)
"यतो वा इमानि भूतानि जायन्ते...संविशन्ति" (२-९)
"स्वे महिम्नि प्रतिष्ठितम्" (२-१०)
"इन्द्रियेभ्य: पराह्यर्था...सा परा गतिः" (२-१५)

घण्टापथे :-

"न हिंस्यात्सर्वा भूतानि"...... (१३-६५)
"तस्माद्दानं परमं वदन्ति"...... (१८-२४)
"अविद्यया मृत्युं तीर्त्वा, विद्ययामृतमश्नुते" (१८-२८)
"ईशानस्सर्वविद्यानां"...... (१८-४२)

सर्वङ्कषायाम् :-

"सोऽहम्" "न सपुनरावर्तते" (१-३२)
"अजामेकां लोहित......भोगामजोन्य:"
"तत्वमसि"...... (१-३३)

जीवातौ :-

"यतो वाचो निवर्तन्ते अप्राप्य मनसा सह" (२-१)
"यत्रास्य पुरुषस्याग्नि...निधीयते" (३-५२)

इत्येवमादीनि ।

सन्तु नाम परश्शतं परस्सहस्रं वा व्याख्यातारः, परन्तु कवीनां

गणनाप्रसङ्गे कालिदासस्यैव व्याख्यातॄणां प्रसङ्गे सर्वतः प्रथममुपतिष्ठते मल्लिनाथसुधियः महनीयं नामधेयम् ।

स हि नूनं जिज्ञासुजनानुजिघृक्षयैव प्रचोदितः "इहान्वयमुखेनैव सर्वं व्याख्यायते मया । नामूलं लिख्यते किञ्चिन्नानपेक्षितमुच्यते" इति प्रत्यजानात् । प्रतिज्ञातमर्थं यथातथं निष्प्रत्यूहं निरवहृच्च ।

व्याख्यानशैली चास्य महाभागस्य अपनीयत्वचं मोचाफलं हस्ते निदधातीव, अतिगभीरमपि कविहृदयं गहनादुद्धृत्य पाठकानां समक्षमुपक्षिपन्ती सहृदयानां हृदयानि अतितरामाकर्षति, आनन्दरसमभिवर्षति, अनन्यलभ्यां अविस्मरणीयां अपूर्वां कामपि अनुभूतिमुद्रामादधाति ।

"जयतु जयतु सोऽयं मल्लिनाथो महात्मा"

ओम्-तत्-सत्



मल्लिनाथस्य वेदान्तवैदुषी

–श्री गोडा सुब्रह्मण्यशास्त्री

अथ तत्रभवान् महोपाध्यायमल्लिनाथ सूरिः आन्ध्रः रघुवंशादीनां प्राचीनानां महाकाव्यानां व्याख्याता सर्वेषु शास्त्रेषु सकलासु कलासु च निष्णातः। प्रकृते ऽस्मिन् लघुनिबन्धे तस्य महापण्डितस्य वेदान्तविद्वत्ता मधिकृत्य तदीयव्याख्याग्रन्थावलम्बेन किञ्चिदिव यथाशक्ति प्रदर्श्यते।

महाकविः कलिदासः कुमारसम्भवमहाकाव्ये "नमस्त्रिमूर्तये तुभ्यं प्राक्सृष्टेः केवलात्मने। गुणत्रयविभागाय पश्चाद्भेदमुपेदुषे" इति श्लोके स्वकीया मुपनिषत्तत्वज्ञतां प्रादर्शयत्। तदीयव्याख्यायां मल्लिनाथसूरिः —"केवलाय- एकरूपाय-'आत्मा वा इदमेक एवाग्र आसीत्' इति श्रुतेः" इति केवलपदं श्रुत्युदाहरणपूर्वकं व्याचक्षाणः अद्वैततत्त्वं सूचयति। तथाहि :- आत्मा वा इदमेक एवाग्र आसीन्नान्यत्किञ्चन मिषत्" इत्यैतरेयोपनिषद्वाक्यम्। तत्रैकपदेन स्वसजातीयभेदः, एवेति पदेन स्वगत भेदः, नान्यत्किञ्चनमिषदित्यनेन विजातीयभेदश्च निवर्त्यंते। यथा वृक्षस्य पत्रपुष्पफलादिभिः स्वगतो भेदः वृक्षान्तरात्सजातीयभेदः शिलादिभिर्विजातीयभेदः एवं ज्ञानानन्दादेः ब्रह्मस्वरूपस्य ब्रह्मधर्मत्वेनारोपितत्वात्तद्गतो भेदः स्वगतभेदः। स्वभिन्नत्वे सति चिदात्मकत्वरूपं स जात्य जीवादौ वर्तत इति तन्निष्ठभेदः सजातीयभेदः। एवं जडभेदो विजातीय भेदः। एतद्भेदत्रयं एकतावधारणद्वैतप्रतिषेधैर्निवार्यते। उक्तंहि पञ्चदश्याम्– "वृक्षस्य स्वगतो भेदः पत्रपुष्पफलादिभिः। वृक्षान्तरात्सजातीयो विजातीयः शिलादितः॥ तथा सद्वस्तुनो भेदत्रयं प्राप्तं निवार्यते। एकावधारणद्वैतप्रतिषेधैस्त्रिभिः क्रमात्"। इति। तत्रान्यपदस्य सामान्य बोधकत्वेन स्वान्यसामान्यभेदव्यावृत्तेः "नान्यत्किञ्चन मिषत्" इत्यने

नैव सम्भवेपि सकोचशङ्कापरिहारायैव एकावधारणपदे श्रुतावुपात्ते यद्यपि, तथापि केवलपदेनैव तादृशार्थो विवक्षितः कविनेति तदीयहृदयज्ञ न मल्लिनाथसूरिणा तदर्थः श्रुत्युदाहरणेन स्पष्टीकृतः।

एवं तस्मिन्नेव श्लोके 'गुणत्रयविभागाय पश्चाद्भेदमुपेयुषे' इत्यर्धे "विभज्यतेऽनेनेति विभागः; भेदोपाधिः गुणानां सत्त्वादीनां त्रयमेव विभागो यस्य तस्मै। भेदं- उपाधिं स्रष्टृत्वादिकमित्यर्थः उपेयुषे" इति व्याचष्टे। एकस्यैवेश्वरस्य स्रष्टृत्वादिभेदः सत्वादिगुणरूपोपधि प्रयुक्त एवेति वेदान्तदर्शने प्रसिद्धम्। उक्तं हि सिद्धान्तबिन्दौ-"कारणी भूतसत्वगुणावच्छिन्नो विष्णुः पालयिता। कारणीभूत रजउपहितो ब्रह्मा स्रष्टा। कारणीभूततमउपहितो रुद्रः संहर्ता। कारणीभूतसत्वाद्यव च्छिन्नचितां विष्ण्वादिरूपत्व मैत्रायणीयशाखायां श्रूयते- 'अथ यो ह खलु वावास्य तामसोंशोऽसौ स ब्रह्मचारिणो योयं रुद्रो य यो ह खलु व व.स्य राजसोंशोऽसौ स ब्रह्मचारिणो योयं ब्रह्माऽय यो ह खलु वावास्य सात्वि कोंशोऽसौ स ब्रह्मचारिणो योऽयं विष्णुः स वा एष पुरुष एकस्त्रिधा भूतः'। इति"॥

अयमपरः कालिदासीयश्लोकः :-

त्वं पितॄणा मपि पिता देवानामपि देवता।
परतोऽपि परश्चासि विधाता वेधसामपि॥

अत्र मल्लिनाथः "इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः। मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान्परः। महतः परमव्यक्तमव्यक्तात्पुरुषः परः। पुरुषान्न परं किञ्चित्सा काष्ठा सा परा गतिः" इति सर्वोत्त रत्वाभिधानात्, इत्याह। अनेन च-आध्यानाय प्रयोजनाभावादित्यधि करणसिद्धान्तः प्रतिपादितः। तथाहि तदधिकरणमेवं प्रवृत्तम्- 'इन्द्रि येभ्यः परा' इत्यादिपूर्वोक्तकाठकवाक्यं विषयः। किमिमानि वाक्यानि भिन्नानि उत आत्मपर मेकमेव वाक्यमिति संशयः। तत्र इन्द्रियादिभ्यः अर्थादीनां परत्वप्रतिपादनमिति भवति मतिः। न च बहूनां परत्वप्रति पादने वाक्यभेदापत्तिरिति वाच्यम्। वाक्यभेदस्येष्टत्वात्; इति पूर्वपक्षे सिद्धान्तः - "पुरुष एवैभ्यः सर्वेभ्यः परः प्रतिपाद्यते इति युक्तम्। न

प्रत्येकमेषां परत्वप्रतिपादनम्। कस्मात्, प्रयोजनाभावात्। न हीतरेषु परत्वेन प्रतिपिपादयिषितेषु किञ्चित्प्रयोजनं दृश्यते श्रूयते वा। पुरुषे त्विन्द्रियादिभ्य. परस्मिन् सर्वानर्थव्रातातीते प्रतिपन्ने, दृश्यते प्रयोजनं मोक्षसिद्धिः। तथा च श्रुतिः 'निचाय्य तं मृत्युमुखात्प्रमुच्यते' इति। अपि च पुरुषान्नपरं किञ्चिदिति परप्रतिषेधेन काष्ठादिशब्देन च पुरुषविषय मादरं दर्शयन् पुरुषप्रतिपत्त्यर्थैव पूर्वापरप्रवाहोक्तिरिति दर्शयति। अपिच "सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पद' मित्युक्ते किं तदध्वनः पारं विष्णोः परमं पदमित्यस्यायाकांक्षायामिन्द्रियाद्यनुक्रमणात्परमपदप्रति पत्त्यर्थ एवायमायास" इत्यवसीयते। इत्येतदधिकरणसिद्धमर्थं सर्वोत्तर त्वाभिधानादित्येकेनैव पदेन संगृह्णातीति अहो अस्य पाण्डित्य प्रकर्षः॥

एवं :- "मनो नवद्वारनिषिद्धवृत्ति हृदि व्यवस्थाप्य समाधिवश्यम्।
यमक्षरं क्षेत्रविदो विदुस्तमात्मानमात्मन्यवलोकयन्तम्॥"

इति कालिदासीयश्लोके "तमात्मानमात्मनि, स्वस्मिन्. अवलो कयन्तम् साक्षात्कुर्वन्तम्. स्वातिरेकेण परमात्मनो ऽभावादिति भावः" इति व्याचक्षणो मल्लिनाथसूरिः. तत्वमसीत्यादिमहावाक्यजन्याखण्ड ब्रह्माकारनिर्विकल्पकसाक्षात्कारमभिप्रैति। अयं हि साक्षात्कारस्तत्वं पदार्थज्ञानाधीनः। तत्र तत्पदस्य जगत्कारणत्वादिविशिष्टचैतन्यं शक्यार्थ इति वक्तव्यम्। तत्र तस्य शक्तिग्रहो नोपपद्यते। प्रमाणान्तरप्रसिद्धे ह्यर्थे सङ्केतग्रहः सम्भवति। न चेदृशस्य तत्पदार्थस्य प्रमाणान्तरेण प्रसिद्धिः। नच "आद्यकार्यं सकर्तृकम्. कार्यत्वात्. घटवत्" इत्यनुमानेन तत्सिद्धिः। कुलालादिक्रिययैव घटादिकार्योत्पत्तिसिद्धौ कुलालादीनां कुलालपितृवदन्यथासिद्धत्वेन घटादिकं प्रति कुलालादेः कारणत्वासिद्धौ तत्सिद्ध्यधीनो "यः यद्विशेषयोः कार्यकारणभावः स तत्सामान्ययोरि" तिन्यायः तदधीनायाः "कार्यत्वं कर्तृजन्यत्व व्याप्य" मिति व्याप्तेरसिद्धेः। तादृशव्याप्तिस्वीकारेऽपि बहुजनाश्रयप्रासादादिदृष्टान्तेत नानाकर्तृकत्वा नुमानापत्तेश्च। एवं त्वंपदार्थस्यावस्थात्रयविशिष्टचिद्रूपस्यापि प्रत्य क्षादिना न ज्ञानमिति तस्यापि तत्र शक्तिग्रहानुपपत्तिः। तथापि "यतो वा इमानि भूतानि जायन्ते" इत्यादिवाक्यैस्तत्पदशक्ति ज्ञानं, जाग्र

त्स्वप्नसुषुप्त्यादिप्रतिपादकश्रुतिभिस्त्वंपदशक्तिज्ञानञ्च भवति। विशिष्टयोश्चैक्यानुपपत्तौ, "सत्यं ज्ञानमनन्त" मित्यादिश्रुतिभिस्तत्पदलक्ष्यार्थ ज्ञाने, "योयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः पुरुषः" इत्यादि श्रुतिभिस्त्वंपदलक्ष्यार्थज्ञाने च सति साक्षादपरोक्ष ब्रह्मविषयकत्वेनापरोक्षरूप निर्विकल्पकसाक्षात्कारो जायते इति सर्वमभिप्रेत्य संक्षेपेण साक्षात्कुर्वन्तम्- स्वातिरेकेण परमात्मनो ऽभावा"दिति व्याचष्टे। स्वातिरेकेण परमात्मनो ऽभावादित्यनेन जीवब्रह्मणोरैक्यमेव श्रुतितिसिद्धमिति द्योतयति। "अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि", "तत्वमसी"त्यादि श्रुतिभिर्जीवब्रह्मणोरैक्यस्य वास्तवत्वात् भेदस्यौपाधिकत्वात्। उपाधेश्च "नेह नानास्ति किञ्चन", "नात्र काचन भिदास्ति" इत्यादिश्रुतिभिर्मिथ्यात्वावगमात्॥

इममेव साक्षात्कारमभिप्रेत्य शिशुपालवधप्रथमसर्गस्थे -''उदीर्णरागप्रतिरोधकञ्जनैरभीक्ष्णमक्षुण्णतयातिदुर्गमम्। उपेयुषो मोक्षपथं मनस्विनस्त्वमग्रभूमिर्निपायसंश्रया''॥ इति श्रीकृष्णवर्णनपरे श्लोके, त्वमेव निरपायः- पुनरावृत्तिरहितः संश्रयः प्राप्तिः यस्याः सा तथोक्ता 'न स पुनरावर्तते' इतिश्रुतेः। अग्रभूमिः- प्राप्यस्थानम्। ''सोहं'' मित्यादिश्रुतेस्तत्प्राप्तेरेव मोक्षत्वादितिभावः। तस्मान्मुमुक्षूणामपि त्वमेव साक्षात्ककरणीय इति सिद्धम्।''तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यते ऽयनाये"ति श्रुतेः – इति व्याचष्टे। ब्रह्मातिरिक्तस्य सर्वस्य ब्रह्मज्ञानमूलकत्वेन ''नेह नानास्ति किञ्चन" इत्यादिश्रुतिभिः तत्सम्बन्धेन तद्धर्मविशिष्टसम्बन्धित्वेन प्रतीयमानयावन्निष्ठत्रैकालिकात्यन्ताभावनिरूपिततत्सम्बन्धावच्छिन्नतद्धर्मावच्छिन्नप्रतियोगित्वरूपमिथ्यात्वे ब्रह्मातिरिक्तस्य सर्वस्य गृहीते सर्वकारणत्वादीनामपि मिथ्यात्वासिद्ध्या तत्पदत्वंपदाभ्यां शुद्धचैतन्यस्योपस्थितौ शुद्धचैतन्यमात्रविषयके मूलाज्ञाने निवृत्त मूलाज्ञानप्रयुक्तानां सर्वेषामपि निवृत्त्या जन्मान्तरप्रापककर्मणो ऽभावेन पुनरावृत्तिर्नास्तीति प्रतिपादयितुं मल्लिनाथः 'न स पुनरावर्तते' इति श्रुतिमुदाजहार॥

नैषधमहाकाव्ये श्लोकः :–

''श्रीभरानतिथिसात्करवाणि स्वोपभोगपरता नहितेति ।
पश्यतो बहिरिवान्तरपीयं दृष्टिसृष्टिरधिका तव कापि'' ।। इति

ये त्वधिकारिणः बहुविधज्ञानकर्मानुष्ठानसम्पादितनिरतिशय परमेश्वरप्रसादमहिम्ना नितान्तनिर्मलीकृतान्तःकरणाः सन्तो जागरेऽपि स्वप्नाद्विशेषं न पश्यन्ति तान् ब्रह्मविद्याकामानधिकृत्य प्रवृत्तां कृत्स्नस्य जगतः प्रबोधस्वापावस्थयोः प्रभवप्रलयप्रतिपादिकां श्रुतिमनुसृत्य दृष्टि सृष्टिवादः पूर्वाचार्यैर्निरूपितः । सा च श्रुति :–"एव मेवास्मादात्मनः सर्वे प्राणा: सर्वे लोका: सर्वे वेदाः सर्वाणि भूतानि सर्व एत आत्मानो व्युच्च रन्ती' ति। दृष्टिसृष्टिर्नाम द्रष्ट्रन्तरावेद्यत्वेसति ज्ञातैकसत्वम्। ननु सर्वस्य दृष्टिसृष्टित्वे- "जीव ईशो विशुद्धा चित् तथा जीवेशयोर्भिदा । अविद्या तच्चितोर्योगः षडस्माकमनादयः" इति वचनेन. बौद्धं प्रति प्रत्यभिज्ञाना दिना प्रपञ्चस्य स्थिरत्वप्रतिपादकभाष्यादिना च विरोध इति चेन्न । अनाद्यतिरिक्तसृष्टिविषय एव दृष्टिसृष्टिस्वीकारात् । कारणात्मना स्थायित्वस्वीकाराच्च । तावतैव बोद्धाभिमतक्षणिकत्वनिराकरणोपपत्तेः नन्वेवं प्रतीतिमात्रशरीरत्वेन नियतकारणाजन्यत्वे श्रुतिषु स्वर्गाद्यर्थं ज्योतिष्टोमादिविधेः ब्रह्मसाक्षात्कारार्थं श्रवणादिविधेश्चासाङ्गतिरिति चेन्न । स्वाप्नकार्यकारणभावबोधकवाक्यदुपपत्तेः । न च सर्वस्य दृष्टि सृष्टित्वे प्रत्यभिज्ञाविरोध इति वाच्यम्। "नेह नानास्ती"त्यादि श्रुतिभिः प्रपञ्चस्य मिथ्यात्वे ऽवधृते रज्जुसर्पादिवत्प्रतिभासमात्रशरीरत्वेमेव प्रतिभासकलातिरिक्तकलासत्वे बाधकम् । अतो भिन्नकालानामात्म भिन्नानां प्रत्यभिज्ञा भ्रान्तिः । अयं च दृष्टिसृष्टिवादो वासिष्ठादो"अवि द्योयोनयो भावा· सर्वेमी बुद्बुदा इव । क्षणमुद्भूय गच्छन्ति ज्ञानैकजलधो लयम्" इत्यादिना विस्तरेण प्रतिपादितः । इममेव दृष्टिसृष्टिवादमभि प्रेत्य उपरिनिर्दिष्टश्लोके महावेदान्तिना महाकविना श्रीहर्षेण दृष्टिसृष्टि पदं प्रयुक्तम् । एतावद्विस्तरेण तन्मतनिरूपणं काव्यव्याख्यायामनुचित मित्यभिप्रेत्य ज्ञानसृष्टिपदेन मल्लिनाथसूरि : सूचयामास ।।

उत्पन्नब्रह्मसाक्षात्कारा महान्तः ब्रह्मातिरिक्तं मिथ्यात्वेन जानन्तोऽपि अज्ञवद्व्यवहरन्ति । महाकविः श्रीहर्षोऽपि स्वीयखण्डनखाद्यग्रनामके ग्रन्थे 'वयं सर्वप्रपञ्च्य सत्त्वासत्त्व व्यवस्थापन विनिवृत्ताः स्वतः सिद्धे चिदात्मनि ब्रह्मतत्त्वे केवले भरमवलम्ब्य चरितार्थाः सुखमास्महे' इति वदन् स्वस्य सञ्जातब्रह्मसाक्षात्कारतां प्रकटयन्नपि अज्ञवदेव ब्रह्मानन्दादपि स्मरानन्दोऽधिक इति भैमीवर्णन प्रस्तावे–"ब्रह्माद्वयस्यान्वभवात्प्रमोदं रोमाग्र एवाग्रनिरीक्षिते ऽस्याः । यथोचितीत्थं तदशेषदृष्टावथ स्मराद्वैतमुदा तयासौ" इति श्लोके प्रतिपादयन् तत्रापि अद्वैतानन्दमनुभवति । अत्रहि भैम्या रोमाग्रदर्शनाद्ब्रह्मानन्दः, सम्पूर्णरोमदर्शनाच्च स्मरानन्दस्ततो ऽधिकोजातः । तच्चोचितमेव । कारणतुल्यत्वात्कार्यजन्मन इत्युक्तम् । अत्र ब्रह्माद्वयस्यानन्दमिति पदसमुदायं व्याचक्षाणो मल्लिनाथसूरिः आनन्दस्य ब्रह्माभेदे ऽप्युपचाराद्भेदव्यपदेश इत्याह । अयमभिप्रायः ब्रह्माद्वयस्येति षष्ठीविभक्त्या ब्रह्मानन्दयोर्भेदो ज्ञायते । षष्ठ्याः सम्बन्धार्थकत्वात् ।सम्बन्धस्य च भेदनियतत्वात् । आनन्दस्तु ब्रह्मस्वरूपमेव न तदतिरिक्तमिति "विज्ञान मानन्द ब्रह्म, आनन्दो ब्रह्मेति व्यजानात्, रसोवै सः" इत्यादिश्रुतिभिर्निश्चितम् । तथासति भेदव्यपदेशः कथमित्याशंक्योपचारादिति समादधौ । "आनन्दो विषयानुभवो नित्यत्वं चेति सन्ति धर्मा अपृथक्त्वेपि चैतन्यात्पृथगिवावभासन्ते" इति पञ्चपादिकावाक्यं मनसि निधायैव एवं व्याचष्टे इति स्पष्टमद्वैतवेदान्तशास्त्रज्ञानाम् ॥

सर्ववेदान्ततत्त्वावबोधकमधोनिर्दिष्टमिमं श्लोकं तद्व्याख्यां चोपन्यस्य विस्तरभयादुपरम्यते–

वस्तु वास्तु घटते न भिदानां योक्तनैकविधबाधविरोधैः ।
तत्त्वदीहितविजृम्भितत्तद्भेदमेतदिति तत्त्वनिरुक्तिः ॥

हे विष्णो; युक्तिसिद्धानेकबाधैर्विरोधैश्च वस्तु घट पटादिरूपद्रव्यजातं भिदानां भेदानां वास्तु आश्रयः इति न युज्यते । एतत् घटादिवस्तु त्वदिच्छया प्रकटितविशेषं विशेषः घटः पटः इत्यादिवैषम्यम् । इति तत्त्व

याथार्थ्यमित्यर्थः । अत्र बाधो विरोधश्च यौक्तिक इति मल्लिनाथेन प्रदर्श्यते। मृन्निर्मितघटस्य मृन्मयत्ववत् एकमात्रमूलकारणकत्वेन वस्तु एकविधमेव भवितुमर्हति । भदेतु युक्तिसिद्धा बहवो बाधाः । तथा एकस्मादेव मूलकारणात् पृथग्वस्तु जायते चेत् तदा तेजस औष्ण्यमिव शैत्यमपि जायत । इत्यादयश्च युक्तिसिद्धा विरोधाः । एवञ्च घटपटादीनां यदय मन्यान्यभेदोऽनुभूयते स न तात्त्विकः । परन्तु भवदिच्छाप्रेरितया अविद्या ख्यया माययैव तत् भासते । अतस्त्वमेवैकः सर्वमिदं वस्तु इति तत्त्व निर्वचनमिति भावः । अनेन भावप्रदर्शनेन मल्लिनाथस्य सर्ववेदान्त तत्त्व ज्ञतैव न, किन्तु खण्डनादिवादग्रन्थाभिज्ञतापि प्रकटितेति कियद्वयं वेदान्तवैदुषीं प्रदर्शयाम इत्यशक्त्या विस्तरभयाच्चोपरम्यते ॥



मल्लिनाथस्य मीमांसाशास्त्रपाण्डित्यम्

—डा. एस्. बि. रघुनाथाचार्यः
श्रीवेङ्कटेश्वर विश्वविद्यालयः, तिरुपति

१. **प्रबन्धसारः :–** आन्ध्रभारतीभाग्यभूमिः व्याख्यातृचक्रवर्ती, कोलाचलकलशाम्बुधिचन्द्रमाः मल्लिनाथ पद–वाक्य-प्रमाणपारावारपारीण इति जागर्ति तावन्महती प्रसिद्धिः तद्व्याख्यानग्रन्थनिबन्धना लोके । अत्रास्मिन् शोधप्रबन्धे 'शास्त्रम्' इत्यन्वर्थनामधेय पूर्वतन्त्र कीदृशं तस्य पाण्डित्यमिति तत्कृतिपरिशीलनपुरस्सरं सूक्ष्मेक्षिकया विचारयितुमाधीयते तावद्यत्नः ।

२. **मल्लिनाथस्य मीमांसकत्वे बाह्यानि प्रमाणानि :–** भारतभारती प्रणयिजनसमादरणार्हो मल्लिनाथः महाविद्वान् मीमांसाशास्त्र इत्यत्र समुल्लसन्ति बहूनि बाह्यान्यपि प्रमाणानि । तत्र सर्वप्रथमं तावत्प्रमाणमिदं यत्– अनेन स्वकीयसकलव्याख्यानारम्भे सन्दृब्धे "वाणीं काणभूजीम्" इत्यादिपद्ये "अन्तस्तन्त्रमरंस्त" इति प्रयोगस्वारस्ये नास्माभिरिदमुन्नेतुं शक्यते यत्-कीदृशी प्रीतिस्तस्य पूर्वमीमांसाशास्त्रे इति ।

एवमेव एकावलीव्याख्यानस्य तरलसमाख्यानस्य अन्ते अपह्नुत्या तन्त्रे स्वकीयं स्वातन्त्र्यं उदारगम्भीरया सरण्या समाविष्करोति । यथा :–

पारीणाः पदसागरस्य कतिचित्तन्त्रे स्वातन्त्राः परे
केचित्कर्कशतर्कवक्रभणितिप्रौढिप्रियंभावुकाः ।

अन्ये सत्कवितामृताब्धिलहरीमृष्टांशमुष्टिंधयाः
नैते केऽपि वयं तु किं तु त इमे सर्वे बहूकुर्वते ॥

इति ।

तथैव कुमारस्वामी रत्नापणारम्भे स्वतातपादविद्यावैशद्यप्रतिपादकं 'वाणीं काणभुजीमि'ति श्लोकरत्नमुदाहृत्य अनुपदमेव तावदेवं प्रस्तौति, यथा–

त्रिस्कन्धशास्त्रजलधिं चुलुकीकुरुते स्म यः ।
तस्य श्रीमल्लिनाथस्य तनयोऽजनि तादृशः ॥

इति । अत्र त्रिस्कन्धशास्त्रजलधिः पद-वाक्य-प्रमाणपारावार एवेति सुप्रसिद्धोऽयमंशः । एवमेव काव्यग्रन्थव्याख्यानां संजीविन्यादीनां तरलव्याख्यानस्य चान्ते गद्य. तथैव तत्तनयस्य कुमारस्वामिसोमपीथिनः रत्नापणव्याख्यानस्य चान्ते अविकृतया दृश्यमानं पद-वाक्य-प्रमाणपारावारपारीण इति विशेषणं वाक्यशास्त्रापरनाम्नः पूर्वमीमांसाशास्त्रस्य वैदुष्यमस्य प्रथयतितराम् । व्याकरण मीमांसां न्यायञ्च अनेनैव क्रमेण पदवाक्यप्रमाणशास्त्रत्वेन ऐदम्प्राथम्येन व्यवहृतवान् सप्तमशतकवासी भट्टबाणः कादम्बर्यामित्यवधेयम् । (काद पृ-३६)-

२·१· **तन्त्रवार्तिकटीका सिद्धाञ्जनम्** :– कुमारिलभट्टेन शाबरभाष्यस्योपरि प्रणीता व्याख्या तन्त्रवार्तिकमिति नाम्ना प्रथते । मीमांसाशास्त्रे प्रधानतमोऽयं ग्रन्थः । तन्त्रवार्तिकस्यास्य सिद्धाञ्जन-नाम्नी टीका काचित् स्वयं प्रणीतेति तरलव्याख्याने कण्ठरवेणैव तावदयं मल्लिनाथः स्पष्टीकरोत्येवम् । यथा–

"उपादेयविधेयत्वगुणत्वानि यजेः फले ।
उद्देश्यत्वानुवाद्यत्वप्राधान्यानि गुणान्वये ॥

इति । इहोद्देशो मानसी विवक्षा । उपादेयत्वमनुष्ठेयत्वम् । तत्र सिद्धस्योद्देशः साध्यस्यानुष्ठानमिति सिद्धसाध्यभावादुद्देश्यत्वोपादेयत्वयो

विरोधः प्राप्ताप्राप्तरूपत्वादनुवाद्यविधेयत्वयोः गुणप्रधानत्वयोस्तत्वादेवेत्यलं प्रसक्तानुप्रसक्त्या । **तदेतत् सम्यग्विवेचितमस्माभिः तन्त्रवार्तिकटीकायां वाजपेयाधिकरणे ।**" इति (तरला पृ· १५२)·

एवमेव तन्त्रवार्तिकस्य व्याख्या काचन कृता मल्लिनाथेनेत्यत्र तत्पुत्रस्य कुमारस्वामिसोमपीथिनः वचनम् अन्यत्प्रमाणम् । तेन स्वकीये प्रतापरुद्रीयव्याख्याने रत्नापणसमाख्याने लक्षणावृत्तिविवरणे तावदेवमभ्यधायि । यथा–

तदुक्तं तातपादैः एकावलीतरले तन्त्रवार्तिकव्याख्याने सिद्धाञ्जने च–

स्वार्थत्यागे समानेऽपि सह तेनान्यलक्षणा ।
यत्रेयमजहत्स्वार्था जहत्स्वार्था तु तं विना ॥

इति । (प्रता· पृ· ८८)· उक्तपूर्वाभ्यां मल्लिनाथ-कुमारस्वामिसोमपीथिवचनाभ्यां इदमस्माभिः प्रत्येतुं शक्यते यत् मीमांसादर्शनसारवेदिताऽसौ तन्त्रवार्तिकस्य प्रसन्नगंभीरं सिद्धाञ्जनं नाम व्याख्यानं प्राणैषीदिति ।

३· एकावल्याः मीमांसकावगाह्यता :– क्रीस्तोःपरं चतुर्दशशतकारंभे लब्धजनुषा विद्याधरनाम्ना विद्वत्तल्लजेन अप्टोन्मेषसमुल्लसिता अलङ्कारशास्त्रसंप्रदायनिरूपणपरा एकावलीनाम्नी कृतिः काचित्सन्दृब्धा । नूनं विद्याधरोऽयं सकलविद्याधरः अन्वर्थनामधेयः । एकावल्यां दृश्यमानायां प्रत्युन्मेषं बहवः शास्त्रसंप्रदायाः दृग्गोचरीभवन्त्यस्माकम् । तत्र सूक्ष्मेक्षिकया परीक्षायां क्रियमाणायां मीमांसाशस्त्रस्य मर्यादाविशेषाः प्रस्फुटमस्माभिः साक्षात्क्रियन्ते । येषां परिचयमन्तरा ग्रन्थकर्तृतात्पर्यं दुरवगाहं जायते । पश्यत त्रिचतुराणि स्थलानि :–

ग्रन्थारम्भे मङ्गलविचारे किं नमस्कारात्मकं कर्म शास्त्रस्य अङ्गं उत प्रधानमिति विकल्प्य, यद्यङ्गं तर्हि किं सन्निपत्योपकारकमथवा आरादुपकारकमिति विमृश्य, पश्चात् यदि प्रधानं तर्हि किमिदं नित्यं नैमित्तिकं काम्यं वेति विकल्प्य सुबहु विचार्य आद्यं द्वयं निरस्य काम्यतां निश्चिन्वता सोदाहरणं मीमांसकसम्प्रदायोः विशदीकृतः ।

ध्वनिनिरूपणप्रस्तावे "प्रतीयमानं प्रति विवदमानान् अभिहितान्वयवादिनः नैयायिकान् वदामः" इत्युपक्रम्य भाट्टाभ्युपमतः अभिहितान्वयवादः महता सरम्भेण प्रत्यपादि ।

तथा वृत्तिनिरूपणावसरे अनुवाद्यानामर्थानां विधेयार्थपरत्वं तात्पर्यस्य व्यापारान्तरत्वं परैरभ्युपगतमिति मीमांसकमतं सम्यगनूदितम् ।

पुनश्च अभिधा-तात्पर्यादिविषयत्वं नास्तीति निरूपयता अप्राप्तं हि विधेयमिति उक्त्वा "लोहितोष्णीषाः ऋत्विजः प्रचरन्ती"ति मीमांसकोदाहरणं स्वीकृत्य तन्मतं सम्यग्विवृतम् ।

एवमेव बहुषु स्थलेषु अनुपजातमीमांसाशास्त्रपरिचयस्य जनस्य दुरवगाहास्सन्दर्भा जाग्रत्येकावल्याम् । अस्यास्तादृश्याः प्रकाशिका महामहोपाध्यायेन महामीमांसकेन मल्लिनाथेन प्रणीता तरलव्याख्या सङ्गतार्थेति सर्वसम्प्रतिपन्नं वचः ।

३·१ तरलव्याख्याने तलस्पर्शि मीमांसाशास्त्रपण्डित्यम् :- तरलव्याख्यानदर्शनेऽस्माकमिदमनुपदमेव प्रतिभाति यत् मीमाँसादर्शने समस्त्यनल्पोऽधिकारः मल्लिनाथस्येति । सरला तरलव्याख्या मल्लिनाथप्रणीतसिद्धाञ्जनदौर्लभ्यसञ्जाततिमिरान् तन्मीमांसावैदुष्यावजिगमिषून् स्मानमृतवर्तिरेव चन्द्रलेखेव समाश्वासयन्ती समुल्लसति । प्रसन्नरमणीये तरलेऽस्मिन् प्रसन्नपदावलीसनाथेन मल्लिनाथेन पञ्जविंशतिस्थलेषु मीमांसाधिकरणस्थविषयसंवादपुरस्सरं मूलार्थः सप्रपञ्चं व्याख्यातः । कति चिदेव स्थलान्यत्र सङ्ग्रहेण समुपस्थाप्यन्ते मया ।

शब्दप्रधानो वेदः प्रभुसम्मित इति प्रतिपादयन् शब्दश्चात्र विधिप्रत्ययोपलक्षितं वाक्यं, प्रवर्तकत्वमेव तस्य प्राधान्यमिति व्यवारीत् । ततः प्रत्ययस्यैव प्रवर्तकत्वे समुपपद्यमाने कथं वाक्यस्य प्रवर्तकत्वमुच्यत इति आशङ्क्य प्रत्ययः विशिष्टः प्रवर्तक इत्युक्ते वाक्यमेव प्रवर्तकमित्यनुक्तिसिद्धमिति सम्यङ्निरूपयन् चोदनास्वरूपप्रतिपादिकां कारिकामपि काञ्चनोद्धरति । २

तथैव ध्वनिनिरूपणप्रस्तावे विद्याधरः एकावल्यां "अभिहिता नामेव पदार्थानामन्वय" इति मन्वानान्......नैयायिकान् वदामः" इति मीमांसकमत खण्डयामास। तत्रत्यतरले मल्लिनाथेन तावदेवं व्यलेखि मीमांसासिद्धान्तः। मीमांसकाः अभिधेयातिरिक्तं प्रतीयमान नाभ्युपग च्छन्ति। ते च अभिहितान्वयवादि-अन्विताभिधानवादभेदेन द्विधा भिन्नाः। न्यायवेदितया तेऽपि नैयायिका भवन्तीति। ३

एवमेवाभिहितान्वयवादि भाट्टमतं विद्याधरप्रतिपादितं स्वीकृत्य- 'पदार्थैरनुरक्तोऽसौ वाक्यार्थः सम्प्रतीयते'

इति भट्टपादोक्तिमनुस्मरन् वाक्यार्थे कारण पदार्था एवेति तद्भूताधिकरणसिद्धान्तं करबदरवत् सुविशदं प्रदर्शयन् स्वमीमांसाशास्त्र वैदुष्यमाविश्चकार। ४

अन्यत्रापि द्वितीयोन्मेषे लक्षणाविचारान्ते "ज्ञानविषयाद्भिन्न त्वेन फलस्याभ्युपगमात्। विषयो हि नीलादिः। फलं तु प्राकटयमिष्यते" इति विद्याधरपङ्क्तिव्याख्यानावसरे अतिसूक्ष्मानप्यंशान् आविष्करोत्ये वम्।

"नीलादिः घटादिरित्यर्थः। प्राकट्यं ज्ञातता। सा च ज्ञान जन्या ज्ञानानुमापिका विषयनिष्ठा। यत्प्रसादात् ज्ञातो घट इति विशिष्ट व्यवहारो जायत इति ज्ञाततावादिनः" इति। (तरल पृ. ७७)

चतुर्थोन्मेषे वाच्यसिद्ध्यङ्गप्रभेदनिरूपणावसरे मीमांसाशास्त्र सिद्धसन्निपत्योपकारक-आरादुपकरूपाङ्गद्वयं उदाहरणतया प्रदर्श्य सम्पा दयति समन्वयमित्यहो मीमांसाशास्त्रसम्प्रदाये तस्य समादरः। ५

षष्ठोन्मेषे अविमृष्टावधेयांशविचारारम्भे विधेयस्यार्थस्य प्राधान्यमनुवाद्यस्याप्राधान्यमिति विद्याधरपङ्क्तिमवलम्ब्य सोपष्टम्भं वाजपेयाधिकरणसारः प्रदर्शितः। ६। पश्चात् प्रकृते विधेयप्राधान्यं नाम तात्पर्यविषयत्वमात्रं, अप्राधान्यमनुवाद्यस्य तात्पर्याविषयत्वमात्रमिति.

मीमांसकानामिव दधिहोमगतं शेषशेषिभावलक्षणं, गुणप्रधानभावं नात्र युज्यत इति रुचिरतरा गमनिका समाविष्कृता । ७

एवं मीमांसाशास्त्रे मल्लिनाथस्य विद्यमानं तलस्पर्शि पाण्डित्यं तरलव्याख्याने बहुषु स्थलेषु अस्माभिरक्षिसात्कर्तुं शक्यते । एतावता विस्तरभिया विरम्यतेतावदन्ततः किञ्चित्प्रस्ताव्य :-

सहोक्तिव्याख्यानेऽप्येवमेव वस्तुतस्त्वित्यारभ्य शाखाप्रस्तरयोरिव शरशात्रवयोरपि शाब्द एव गुणप्रधानभाव इति महता प्रपञ्चेन न्यरूपि । ८

अन्यत्र पर्यायोक्तप्रस्तावे अलङ्कारः अलङ्कार्यस्य शेषः न तु विपरीत इत्युक्त्वा :-

"यथैन्द्र्या गार्हपत्यमुपतिष्ठत" इत्यत्र द्वितीयानिर्देशात् प्रधानगार्हपत्यानुरोधेनाप्रधानस्य एन्द्रीशब्दस्यान्यथानयनं तद्वदिति भावः । इति ९ दृष्टान्ततया मीमांसाशास्त्रार्थमुपसङ्गृह्णाति ।

तथा यथासंख्यालङ्कारव्याख्याने मीमांसाशास्त्रसिद्धं देश-सामान्यरूपं क्रमं सोदाहरणं निरूप्य समन्वयोऽकारि । १०

३.२ समुद्धृतानि मीमांसाधिकरणानि :– मीमांसाशास्त्रसम्प्रदायप्रकाशनबहुले तरले मल्लिनाथेन महामीमांसकेन बहूनि मीमांसाधिकरणानि नामोत्कीर्तनपुरस्सरं समुद्धृतानि । कानि चिदधिकरणानि नामोच्चारणं विना स्पृष्टानि । मङ्गलविचारे ज्योतिष्टोम–रात्रिसत्र–विश्वजिदधिकरणानि उदाहरणतया विकल्परूपेण प्रदर्शितानि (तरल पृ ६) । ततः सङ्केतविचारे आकृत्यधिकरणं (तरल पृ.३६) तद्भूताधिकरणं इति (तरल पृ ३७) द्वयम् । तथा अविमृष्टविधेयांशविचारे वाजपेयाधिकरणमिति (तरल पृ.१५२) इमान्यधिकरणानि मुख्यानि कण्ठरवेण तरलव्याख्याने समुद्धृतानि ।

३.३ भाट्ट-प्राभाकरमतविवेकः – भाट्ट-प्राभाकरभेदेन द्विधा विभिन्ने पूर्वतन्त्रे मल्लिनाथः प्रामाणिकः पण्डित इत्यत्र तरलव्याख्याने

मल्लिनाथस्य व्याकरणवैदुष्यम्

—श्री पेरिसूर्यनारायणशास्त्री
राघवेन्द्रमठ् मन्त्रालय:

श्रीमान् मल्लिनाथः सर्वतन्त्रस्वतन्त्रः, तेन महात्मनाऽचुम्बित शास्त्रं नास्ति, तत्कृतव्याख्यानग्रन्थपरिशीलने महाविदुषस्तस्य पाण्डित्यप्रकर्षोऽवगम्यते। प्रकृते निबन्धे व्याकरणशास्त्रे यादृशं पाण्डित्यं तेन समुपार्जितं तदधिकृत्य लिख्यते—

नैषधीयचरिते द्वितीयसर्गे पद्यमिदम्-

"अधरं किल बिम्बनामकं
फलमस्मादिति भव्यमन्वयम् ।
लभतेऽधरबिम्बमित्यदः
पदमस्या रदनच्छदं वदत् ।" ॥२४॥

भैम्या अधरोष्टं वर्णयति कविः । अधरबिम्बमितिपदं कविभिरधरं बिम्बमिवेत्युपमितसमासश्रयणेन स्त्रिया अधरोष्ठबिम्बफलसदृशमित्यर्थपरतया प्रयुज्यते । इतरे कवयस्तत्पदमुपमितसमासपरतया प्रयुञ्जन्तु नाम, तत्पदमपि तत्समासार्थमाश्रित्यैवाऽन्यासां स्त्रीणामधरं बोधयतु नाम । वैतण्डिकः श्रीहर्षकविस्तु-तत्पदं पञ्चम्यर्थे बहुव्रीहिणैव दमयन्तीरदच्छदं बोधयती-तिपद्येस्मिन्प्रति जानीते। एतदाशयेनैव अधरबिम्बमिति समस्तपदस्य अधर बिम्बनामकं फलमस्मादिति बहुव्रीहिपरत्वमेवेति प्रतिबोधनाय पद्यपूर्वार्धेन विग्रहं दर्शयति बिम्बं=बिम्बनामकं फलम्, अस्मात्=दमयन्त्या रदनच्छदात्, अधरम्

—अपकृष्टमिति तदर्थः। कविदृष्टया उपमानस्थानीयत्वेन बिम्ब—फलस्याधिक्यमुपमेयस्थानीयतया रदनच्छदस्यापकृष्टत्वं च प्रतीयते, तथैव लोकोपि प्रत्येति. श्रीहर्षस्त्वेवमभिप्रैति—दमयन्त्या रदनच्छदो बिम्बफलादप्युत्कृष्ट एव, न ततो न्यून-इति. एष चार्थो बहुव्रीहिसमासेन निर्वहति, एवं चेतरस्त्रीणामधरं बिम्बफलादपकृष्टम्, तादृशफलमपि दमयन्तीरदनच्छदाद् न्यूनमेवेति शब्दशक्त्या प्रतीयमानत्वेन भैम्यधरोष्ठे लोकातिशायिसौन्दर्यं व्यज्यत इति पद्यतात्पर्यमवगम्यते। एषा काव्य शोभाऽनयारीत्या प्रत्यपादि।

व्याकरणशास्त्ररीत्यापि अधरबिम्बपदं बहुव्रीहिसमाश्रयण एव साधुतां प्रतिपद्यते, न तूपमितसमासाश्रयण इति निगूढं महाभाष्य कारीयसिद्धान्तमनेन पद्येन पाठकानां प्रतिबोधयति श्रीहर्षकविः। तथाहि-"उपमानानि सामान्यवचनैः" 2-1-55 इतिसूत्रस्थमहाभाष्या-र्थपर्यालोचनया उपमितसमासस्याऽसमर्थसमासत्वमधिगम्यते-साधारण धर्मस्योपमेये उपमाने च शाब्दोऽन्वयः कार्य इतितद्वाक्यार्थः पर्यवस्यति। एव च 'चन्द्र इव मुखमाह्लादक' मित्यादौ आह्लादकोपमानभूतचन्द्रा भिन्नमाह्लादकं मुखमित्यादिरीत्या शाब्दबोधः सिध्यति। एवं हि उपमानस्य चन्द्रादेराह्लदकत्वरूपविशेषणवत्वेन सापेक्षत्वेनच "सविशेषणानां वृत्तिर्न" "सापेक्षमसमर्थव" दितिकात्यायनवार्तिक—रीत्या एकार्थीभावरूपसामर्थ्याभावेन अधरबिम्बमित्यादय उपमितस-मासाः शास्त्रदृष्ट्याऽसाधव एव भवन्ति। तथापि पाणिनिमहर्षिणो-पदिष्टत्वादसूर्यम्पश्या इत्यादीनामिवोपमितसमासस्यापित्साधुत्व माश्रीयते पदशास्त्रपारदृश्वभिः। अधरं बिम्बं यस्मात् तत्=अधर-बिम्बमितिरीत्या पञ्चम्यर्थेबहुव्रीत्हाश्रयणे तु एकार्थीभावरूपसामर्थ्य-सत्वेन "अनेकमन्यपदार्थे" 2–2–24 इतिसूत्रेण समासः सिध्यति। सत्यां गतौ किमसमर्थसमासमाश्रित्य अधरबिम्बादीनां प्रयोगः क्रियते, बहुव्रीहिरेवाश्रीयतामिति महाकविः प्रतिबोधयति। एनमेवाशयं

मनसि निधाय ''भव्यमन्वयं लभते "इतिसिंहनादं करोति। एतादृशशास्त्रार्थः श्रीहर्षेणैव ज्ञायते नान्येन।

एतादृशमाशयमाकलय्यैव श्रीमान् मल्लिनाथः पद्यमिदमेवं व्याचष्टे-

"बहुव्रीहिसमासे च सति भव्यम्=अबाधितमन्तव्यम्
यं वृतिपदार्थसंसर्गलक्षण लभते, अन्यथाऽ–
समर्थसमासाश्रयणे "समर्थः पदविधि:"
2-1-1 इति समर्थपरिभाषा भज्येत''

कृत्तद्धितादिवृत्तीनामेकार्थीभावसामर्थ्यं मूलभूतम्। तद्बोधकं च ''समर्थः पदविधि" 2-1-1 रिति पाणिनेः सूत्रम्, 'यत्किञ्चित्पदजन्यपृथगुपस्थितिविषयार्थकत्वेन लोके दृष्टानां शब्दानां विशिष्टविषयैकशसया एकोपस्थितिजनकत्वमेकार्थीभावाः, इति एकार्थीभाव क्षण शास्त्रविद आचक्षते। स एव वृतिघटकपदार्थानां संसर्गरूपोन्वयइति मल्लिनाथेन व्याख्यातः, तथाच समर्थसूत्रे भाप्यम्-" भेदसंसर्गौ सामर्थ्य म्" इति

एतत्पद्यव्याख्याने एको मल्लिनाथ एव पटीयानासीत्। नान्ये प्रबभूवुः।

एवंच "अधरेकिले" ति श्रोहर्षपद्य मल्लिनाथव्या व्यया, मल्लिनाथव्याख्या श्रीहर्षपद्येन चान्योन्यशोभांजनयद् भूषणभूष्यभाव परस्पर धत्त इत्यत्र न काप्यतिशयोक्तिः। एव मार्थिकव्याकरणपा ण्डित्यं मल्लिनाथ स्य निरतिशयमभिव्यनक्ति एतत्पद्यव्याख्या।

तस्यमहानुभावस्य प्रक्रियाव्याकरणपाण्डित्यं पश्यन्तु सचेतसो विन्द्वांस :-

"अपि लोकयुगं दृशावपि
श्रुतदृष्टा रमणीगुणा अपि ।
श्रुतिगामितया दमस्वसु-
र्व्यतिभाते सुतरां धरापते" 22, 2 सर्गे । नलं प्रति

हंसस्योक्तिरियम् प्रथमवाक्ये 'लोकयुग' मितिकर्तृवाचकमेकवचनान्तम्, द्वितीयस्मिन् 'दृशा' वितिकर्तृवाचकं द्विवचनान्तम् तृतीये रमणीगुणा 'इतिकर्तृवाचकं बहुवचनम्' वाक्यत्रयेपि व्यतिभाते इत्येकमेव क्रियापदम् तत्तयैवानुपूर्व्या एकवचनान्तं द्विवचनान्त बहुवचनान्तंच । लोकयुगं=मातापितृरूपम् । वाक्यत्रयेपि श्रुतिगामित्वमेवहे तु-रूपात्तः ।

भा दीप्तावित्यदादिकोधातुः, सच परस्मैपदी । भाति-भातः, भान्ति, इति लटि प्रथमपुरुषे रूपाणि। व्यतिपूर्वकात्तस्माद्धातोः "कर्तरि कर्मव्यतीहारे ॥ 1.3.14 इति सूत्रेणात्मनेपदं प्रवर्तते. कर्तरि सार्वधातुके परे "कर्तरिशप्" 3-1-18 इतिविहितस्य शपो विकरणस्य "अदिप्रभृतिभ्यः शपः'' 2.4-72 इतिलुक्, वचनत्रयेपि "टितआत्मनेपदानां टेरे'' 3-4-79 इत्यनेन टेरेकारः, व्यतिभाते इत्येकवचनान्तम्, द्विवचने सवर्णदीर्घे, व्यतिभाते, इतिरूपम्, बहुवचने "झोन्तः" 7-1-3 इन्यन्तादेशं बाधित्वा "आत्मनेपदेष्वनतः'' 7-1-5 इत्यनेन 'अत्' आदेशः, सवर्णदीर्घे 'व्यतिभाते' इतिरूपम्। एवंच लोकयुगं=मातापितृरूपम् 1. व्यतिभाते,= अतिशयेन प्रकाशते, दृशौ=कर्णौ, 2. व्यतिभाते=अतिशयेन प्रकाशेते, रमणीगुणाः, 3. व्यतिभाते=अतिशयेन प्रकाशन्ते, इति पद्ये वाक्यत्रयं निष्पद्यते । 1. व्यतिभाते, 2. व्यतिभाते, 3. व्यतिभाते, एतादृशास्तिङन्तशब्दा बहवः सन्ति, तेषां परिज्ञानं व्याकरणशास्त्रज्ञानाधीनम्, व्याकरणविषये एवमस्ति मल्लिनाथस्य एतत्पद्यव्याख्या—

"आत्मनेपदेष्वनतः" इतिझस्यादादेशः, सर्वत्र "कर्तरिकर्मव्यतिहारे" इत्यात्मनेपदम्, अदादित्वाच्छपो लुक्, सर्वत्रटेरेत्वम्"

एषा व्याख्या व्याकरणे कृतभूरिपरिश्रमाणामेव हृदयमाकर्षति, यतः, आत्मनेपदेष्वनतः, इत्यदादेशः. इति मल्लिनाथस्य वचनम् अत् आदेशः शोऽन्तः इतिसूत्रविहितस्य अन्त्. आदेशस्या पवादः, बाध्यमादेशमप्रदर्श्यैव बाधकं लिखति मल्लिनाथः, ग्रन्थगौरवं परिहर्तुं स्वीयव्याकरणपाण्डित्यप्रकर्षमाविष्कर्तुंच "सर्वत्रात्मनेपदम्, सर्वत्रैत्व" मितिप्रौढ्या व्याख्याति ॥

स्थलान्तरं पश्यामः-

"सरसीः परिशीलितुं मया
गमिकर्मीकृतनैकनीवृता ।
अतिथित्वमनायि सा दृशोः
सदसत्संशयगोचरोदरी" ॥ 50, 2, सर्गे । अत्र

परिशीलितुम्, गमिकर्मीकृत, 'नैक' 'उदरी' इतिस्थलचतुष्टयमधिकृत्य-व्याकरणदृष्ट्या विचार्यते-

1. परिपूर्वकात् शीलयातोस्तुमुन्प्रत्यये परिशीलितुमितिपदं निष्पद्यते। परंतु धातुपाठे शीलसमाधौ इति भौवादिको धातुः, तस्मादिदं रूपं सिध्यति. किंतु प्रकृतायोनघटते.अत शील उपधारणे इति चौरादिको धातुर्ग्राह्यः, उपधारणम्=अभ्यासः । ततश्चुरादिपाठाद् णिचि ततस्तुमुनि इडागमे गुणायादेशयोः'परिशीलयितु' मितिपदं सिध्यति, नतु परिशीलितु मिति, चुरादिणिचो विकल्पबोधकं पाणिनीय वचनं नास्ति । अतः किंकर्तव्यमिति विमृश्य शाब्दिका एवं निरणैषुः- चितिस्मृत्या मित्यादाविदिकरणादिना लिङ्गेन चुरादिणिचः पाक्षिकल-मिति तन्निर्णयानुस्मरणेन परिशीलितुमिति प्रायुङ्क्त वैतण्डिकः श्रीहर्षः । एतादृशं विषयगाम्भीर्यं मनसिकृत्यैव व्याचष्टे मल्लिनाथः-

"परिशीलितुं=परिचेतुं तत्रविहर्तुमित्यर्थः ।
चुरादिणेरनित्यत्वादण्ण्यन्तप्रयोगः ॥

2. गम्लृ गतावितिधातोः "रोगाख्यायां ण्वुल्बहुल" 3-3-108 मितिसूत्रे पठितेन "इक्स्तिपौधातुनिर्देशे" इतिकात्यायनवचनेन इक् कृत्प्रत्ययः। गमिः गम्धातुः। एवं चायं केवलं धातुस्वरूपं बोधयति। कर्मशब्देनात्र क्रिया न ग्राहृत्या, किंतु "कर्तुरीप्सिततमं कर्म" 1-4-49 इतिसूत्रेण लक्षितं कर्म ग्राहयम्, कर्तुः क्रियया आप्तुमिष्टतमं कारकं कर्मसंज्ञस्यादितितत्सूत्रार्थः। एतस्मिन् कर्मणि "कर्मणिद्वितीया" 2-3-2 इत्यनेन द्वितीया प्रवर्तते। यथा-ग्रामं गच्छति, अत्रोत्तरदेशसयोगानुकूलो व्यापारो गमेरर्थः, चैत्रादिनिष्ठव्यापारजन्यसंयोगरूपफलाश्रयत्वेन ग्रामस्य कर्मत्वम्। प्रकृतेपि अनेकजनपदानां गमिकर्मत्वमया सपादित-मिति हंसवाक्यार्थः। इयमत्रविप्रतिपत्तिः, यत्-श्लोके गमिः शब्दः, तत्र नीवृतां कर्मत्वमसंभवि, अतो गमिशब्दे शब्दबोधकेऽनुपपत्तिप्रतिसन्धाना-ल्लक्षणा स्वीकार्या, तेन तच्छब्दस्यार्थपरत्वलाभात्तत्र नीवृतां कर्मत्वं-प्रसिध्यति, तथाचगमिः=गमनम्, संयोगानुकूलव्यापारः, तत्र कर्मीकृताः= कर्मकारकत्वं सम्पादिता इति तदर्थः सिध्यति। एनमाशयमाविष्करोति वैयाकरणतल्लजो मल्लिनाथः-

"गमिः गमनम्, शब्दपरशब्देनार्थो गम्यते, तस्य कर्मीकृताः= कर्मकारकीकृताः"

गमिधात्वर्थसंयोगरूपफलाश्रयीकृता इत्यर्थलाभेन ग्रामसंयोगो हंसस्य प्रतिपादितो भवति, अहं तादृशाननेकान् जनपदानगच्छमिति तात्पर्यम्।

3. नञः एकशब्देन "नञ्" 2-2-6 इत्यनेन नञ्समासे "नलोपो नञः" 6-3-73 इत्यनेन उत्तरपदे परतो नकारस्य लोपे तस्मान्नुडचि, 6-3-74 इत्यनेन नुडागमः, स च टित्वादाद्यवयवः तथाच अनेक इति रूपं सिध्यति अस्माकं वैतण्डिकचक्रवर्ती तु नैक, इत्येव प्रयुयुजे,

तस्यगतिः का शतकोटिदरिद्राणा मनन्तकोत्युपायाः इतिजनोक्तिः- न, द्वयमस्ति. न, 2. नञ्, तयोरेकार्थकत्वमेव, परंतु अकारेत्संज्ञको द्वितीयः तद्रहितः प्रथमः नञासमासे निरुक्ता प्रक्रिया, प्रथमेन "नशब्देन" सहसुपा। 2-1-4 इतिसमासे नकारो न लुप्यते, नएक इत्यवस्थायां वृद्धौ नैकपदं सुसाधु संभवति। पश्यन्तु मल्लिनाथव्याख्याम्—

"नैके=अजेके, नञर्थस्य नशब्दस्य सुप्सुपेति समासः"

4. उदरस्य "अद्रवं मूर्तिमत्स्वाङ्ग" मितिवार्तिकरीत्या स्वाङ्गत्वात्ततः "स्वाङ्गाच्चो त्वाततः स्वाङ्गञ्जपसर्जनादसंयोगोपधात्" 4-1-54 इति ङीष् प्रवर्तते, परंतु उदरशब्दस्य बह्वच्कत्वेन "नक्रोडादिबह्वचः" 4-1-56 इत्यनेन सुजघनेत्यादाविव निषेधः प्रसज्यते, तद्बाधनेन प्रतिप्रसवतया "नासिकोदरोष्ठजङ्घादन्त कर्णशृङ्गाच्च" 4-1-55 इत्यनेन ङीष् विधीयते, अनेन मार्गण प्रकृते ङीषं संपाध साधुत्वं पाणिनिना प्रदर्शितम्।

एवं श्रीमान् मल्लिनाथः पन्नगगवीगुम्फेषु चाजागरीत्॥

मन्त्रालयः
22-3-79

एवं
पेरि सूर्यनारायणशास्त्री।

मल्लिनाथसूरेः व्याकरणशास्त्रवैदुष्यम् ।

–**Tatta Varadacharya**
Vyakarana Vidyaaveenapur Rted. Pandit.:
S. N. S. College Chittigudur, Krishna Dt..

"ऐन्द्रं चान्द्रं काशकृत्स्नं कौमारं शाकटायनम् ।
सारस्वत चापिशलं शाकलं पाणिनीयकम् ।।"

इति नव व्याकरणानि सुप्रसिद्धानि । सर्वेष्वपि व्याकरणेषु लौकिकवैदिकोभयशब्दसाधकतया पाणिनीयव्याकरणस्यैव प्राधान्यम् । विदित ननु त्रिमुनिव्याकरणमिति। भगवन्तः पाणिनिकात्यायनपतञ्जलयः शब्दशास्त्रकर्तारः मुनयो विश्रुताः चतुस्सहस्रसूत्रसहितामष्टाध्यायीं प्रणिनाय पाणिनिः वररुचिरिति ख्यातः कात्यायनोऽपि सूत्राणामङ्गतया वार्तिकान्युक्तवान्। गोनर्दीयः पतञ्जलिश्च महाभाष्यं व्यरीरचत् यथोत्तरं मुनीनां प्रामाण्यमिति न्यायेन उत्तरोत्तरोत्कर्ष एषां समजनि ।

मुनित्रयप्रणीतं व्याकरणं मल्लिनाथेन सम्यगधीतम् । काव्यव्याख्यानेषु पदशास्त्रपाण्डित्यं प्रकटितमनेन ।

"वाणीं काणभुजीमजीगणदवाशासीच्च वैयासकी-
मन्तस्तन्त्रमरंस्त पन्नगगवीगुम्फेषु चाजागरीत् ।।
वाचामाचकलद्रहस्यमखिलं यश्चाक्षपादस्फुरां
लोकेऽभूद्यदुपज्ञमेव विदुषां सौजन्यजन्यं यशः ।।
मल्लिनाथकविस्सोऽयं मन्दात्मानुजिघृक्षया ।
व्याचष्टे कालिदासीयं काव्यत्रयमनाकुलम् ।।"

हृद्यमिदं पद्यं तस्य पाणिनीये पाटवं प्रकटयति मल्लिनाथः न्याय वैशेषिके, पूर्वोत्तरमीमांसे, महाभाष्यं चाधीतवानिति पण्डितेषु सौजन्य-मस्तीति निरूपितवानिति मन्दाधिकारिणामुपयोगाय कालिदासत्रयीं व्याख्यातीति च भावोऽस्य पद्यस्य ।

वागर्थयोश्चमत्कारेण व्याकरणविशेषैश्च युक्तोऽयं श्लोकः तस्य वैयाकरणतामालङ्कारिकतां च साधु निरूपयति ।

बिडौजाइति पदं गृह्यताम् । अस्य विग्रहे महत्कौशलमनेन प्रदर्शितम् ।"विल्षुव्याप्तौ इति धातुः । वेवेष्टि व्याप्नोतीतिविट् व्यापकम् । विट् ओजः यस्य सः बिडौजाः पृषोदरादित्वात्साधुः ।

'बिस्माययन् विस्मितमात्मवृत्तौ' इति कालिदासीयं प्रयोगं साधयति । पश्यत । "स्मिङ् ईषद्धसने" इत्यस्माद्धातोर्णिचि वृद्धावयादेशे शतृप्रत्यये च विस्माययन्निति रूपंसिद्धम् । विस्मापयन्निति पाठे तु पुगागममात्रं वक्तव्यम् । तच्च "नित्यंस्मयतेः" इति हेतुभयविवक्षाया-मेवेति "भीस्म्योर्हेतुभये" इत्यात्मनेपदेविस्मापयमान इति स्यात् । तस्मान्मनुष्यवाचा विस्माययन्निति सिद्धम् । करणविवक्षायां न कश्चि-द्दोषः ।

अलं महीपाल तव श्रमेण ईतिश्लोके अलं श्रमेण इत्यत्र तृतीया-विभक्तिमेवं साधयति । अलं श्रमेण=साध्याभावाच्छ्रमो न कर्तव्य-इत्यर्थः । अत्र गम्यमानसाधनक्रिया पेक्षया श्रमस्य करणत्वात्तृतीया । उक्तं च न्यासोद्योते न केवलं श्रूयमाणैव क्रियानिमितं करणभावस्य अपि तर्हि गम्यमानापि ।

राजन्शब्दः सर्वैं श्रूयते । तस्यत्व्युत्पादने रञ्जयतीति राजा इति पण्डिता अपि कथयन्ति । मल्लिनाथस्तु विदित्वैतदेवं वदति-यद्यपि

राजशब्दो राजते दाह्यर्थात् कनिन् प्रत्ययान्तो न रञ्जे स्तथापि धातूनामनेकार्थत्वात् रञ्जनाद्राजेत्युक्त कविना । अहो मतिविभवो मल्लिनाथस्य ।

'इक्षुच्छायनिषादिन्यः इक्षुच्छायानिषादिन्यः' इति पाठद्वयमस्ति। तत्रस्वाभिप्रायमेवमाविष्क रोति शास्त्राभिज्ञो मल्लिनाथः। इक्षूणां छाया इक्षुच्छायम् । "छायाबाहुल्ये" इति नपुंसकत्वम् तत्रनिषण्णा श्चच्छायानिषादिन्यः । इक्षुच्छायानिषादिन्य इति स्त्रीलिङ्गपाठे इक्षोश्च्छायेति विग्रहः । अन्यथा ।

बहुत्वे नपुंसकत्वप्रसङ्गात् ।
अहो सूक्ष्मार्थदर्शिता मल्लिनाथस्य ।।

गजदानसुगन्धिनेत्यत्र समासान्तमिकारा देशमाशङ्क्य परिहरति सूरिः । ''गन्धस्ये"त्यादिना इकारादेशस्समासान्तः । यद्यपि गन्धस्येत्वे "तदेकान्तग्रहणं कर्तव्य" मिति नैसर्गिकगन्धविवक्षायामेवेकारादेशः सुगन्धिर्वायुसलिलं चेति उदाहरणम् । तथापिनिरङ्कुशाः कवयः । तथा माघकाव्ये-ववुरयुक्छदगुच्छसुमन्धयः सततमास्ततगानगिरोलिभिः । (6-50) नैषधे च-अपां हि तृप्ताय न वारिधारा स्वादुस्सुगन्धिस्स्वदते तुषारा" इति ''न कर्मधारयान्मत्वर्थीय'' इति निषेधादिनिप्रत्ययपक्षोऽपि जघन्य एव ।

अहो मर्मतलस्पर्शित्वं मल्लिनाथस्य ।

एवं बहुषुस्थलेषु स्वव्याकरणशस्त्रपाण्डित्यं प्रकटितं सकलविद्यासनाथेन पूजितगणनाथेन मल्लिनाथेन ।

।। सर्वे जनास्सुखिनो भवन्तु ।।

सर्वङ्कषा–तत्वनिकषः

–श्री तट्टा नरसिंहाचार्यः

व्याख्यातृशिरोमणिः मल्लिनाथसूरिः कूल षया प्रज्ञया महाकवेर्माघस्य कृतेश्शिशुपालवधस्य सर्वङ्कषाख्यां व्याख्यां विरचय्य, अभ्रङ्कषां कीर्तिलेभे ।

किं नाम व्याख्यानम् ?
पदच्छेदः पदार्थोक्तिर्विग्रहो वाक्ययोजना ।
आक्षेपश्च समाधानं व्याख्यानं षड्विधं स्मृतम् ॥

समग्रमिदंलक्षणं मल्लिनाथेनासूतमक्षरशः । अन्वयमारचयन्नयं पदविभागं सम्यग्विधत्ते । नैघण्टुकवचनानुसारेण पदस्य समुचितमर्थमयं वक्ति । यथा–सुपात्रनिक्षेपनिराकुलात्मना" 1-25 इत्यत्र सुपात्रे योग्यपुरुषे कटाहादिदृढभाजने च निक्षेपेण निधानेन च निराकुलात्मना स्वस्थचित्तेन । "योग्यभाजनयोः पात्र"मित्यमरः ।

विग्रहाभिधाने पद्धतिरस्य मनोज्ञा मञ्जुला च । नभस्याकाशे सीदन्तीति 1-11 नभस्सदः । सत्सूद्विषे क्विप् ।

"अर्थिनः अभिलाषवन्तः । 1-12 अर्थनमर्थोऽभिलाषः । स एषामस्तीति मत्वर्थ इनिर्न तुणिनिः । कृद्वृत्तेस्तद्धितवृत्तिर्बलीयसीति भाष्यात् ।

सप्त छदाः पर्वसुयस्ये1-17 ति सप्तच्छदो वृक्षभेदः। "संख्याशब्दस्य वृत्तिविषये वीप्सार्थत्वं सप्तपर्णादिवत्" इत्युक्तं भाष्ये तृतीया द्यौस्त्रिदिवः। स्वर्गः। तस्मात् घञार्थे कविधानम्। वृत्तिविषये संख्या शब्दस्य पूरणार्थत्वं त्रिभागादिवत्।

तिस्रोदशाः बाल्य-कौमार-यौवनानि, जन्म-सत्तावृद्धयो वा येषान्तैस्त्रिदशैः 1-46 देवैः। यद्वा त्रिदशपरिमाणमेषामिति। "बहुव्रीहौ संख्येयेडजबहुगणा"-दिति समासान्तः।

1-48 विश्रवसोऽपत्य पुमान्रावण इति विग्रहः। तस्यापत्यमित्यणिकृते विश्रवसोविश्रवणरावणौ इति प्रकृते रवणादेशः। पौराणिकास्तु रावयतीतिव्युत्पादयन्ति। तदुक्तमुत्तरकाण्डे-"यस्माल्लोकत्रयं चैतद्रावितं भयमागतम्। तस्मात्वं रावणो नाम नाम्ना वीरोभविष्यसि" इति।

3-72 संयात्रा संभूययात्रा। सा प्रयोजनमेषां तान् सांयात्रिकान्' "सांयात्रिकः पोतवणिक्" इत्यमरः। "प्रयोजनम्" इति ठक्।

दयिताभिः दयितैश्च दयितैः। "पुमान्स्त्रिया" इत्येकशेषः। 7-19 तस्यप्रियस्य अंसौ पीठे इव तयोर्द्वयोर्निहितावुभौ पाणिपल्लवौ यया सा सती। उभादुदात्तोनित्यम् इति पृथक् सूत्रग्रहणादेवसिद्धे, पुनर्नित्यग्रहण सामर्थ्यात् वृत्तिविषये उभशब्दस्थानेप्युभयशब्द प्रयोगः। यथाहकैयटः- "उभादुदात्तोनित्य"मिति नित्यग्रहणस्येदं प्रयोजनम् वृत्तिविषये उभशब्द प्रयोगो मा भूत् उभयशब्दस्यैव यथास्यात् इत्युभयत्रेत्यादि भवतीति।

आक्षेपसमाधानयोरिदमुदाहरणम्-

1-5 नवानधोध इति पञ्चमं श्लोकं चयस्त्विषामिति 1-4 चतु-

र्थश्लोकात् प्राक् केचिल्लिखन्ति तत्कथं संघटते ? इत्याक्षेपः। समाधानं तु पुंस्त्वावधारणात् प्राक् तेजःपुञ्जमात्रस्य शम्भुना साहृश्यस्य वक्तुमशक्यत्वात् इति। "इहान्वयमुखेनैव" इति सक्रमोन्वयक्रमस्सर्वत्रानुसृत इति वाक्ययोजनापि समीचीनैव।

सर्वेषु शास्त्रेष्वयं कृतभूरिपरिश्रमः। वादशास्त्रे तर्कशास्त्रे मल्लिनाथ स्स्वशक्तिं तत्र तत्र प्रदर्शितवान्। "कामिभिराननैर्नासिकाभिश्च मधुरस उत्पलगन्धश्च युगपत्पीतौ" इत्युक्तम्। भिन्नेन्द्रियग्राह्यावपि गन्धरसौ स्वेन्द्रियसम्बन्धात् युगपद्गृहीतावित्यर्थः। अत्र मनसः आशुसञ्चाराद्यौगपद्याभिमानः। शतपत्रपत्रशतवेधवदित्यणुपरिमाणवादिनः। वास्तवमेव यौगपद्यमिति मध्यमपरिमाणवादिनः। सार्वपथीनास्तु कवय इत्यलमतिपल्लवितेन। एतेन प्रघट्टकेन न्यायशास्त्रपाण्डित्यं विशदीभवति।

अनुसन्ततिपातिन 20-11 इति श्लोकव्याख्यानावसरे "वादिनो मुखात् अविच्छेदेन आगच्छन्तः वाचकत्व शक्तिं दधतः दोषरहिताः निश्चितसाध्यवन्तः प्रतिज्ञाहेतूदाहरणोपनयनिगमनाख्या श्शब्दा यथा प्रसरन्ति तथा वैद्यस्य धनुषस्सकाशात् अविच्छेदवर्तिनः लक्ष्यभेदपाटवं वहन्तः निर्विषास्वीकृतकङ्कादिपत्रा श्शराः प्रसस्रुरितिकथयता सूरिणा न्यायशास्त्रपाण्डित्यं स्फुटीकृतम्।

"इषुवर्षमनेकमेकवीरः" 20-18 इति श्लोकव्याख्यानावसरे महाशूरो हरिरपि शत्रुगलितमिषुवर्षं वादिना कृतमनुमानं, इतरैरनुमानप्रमाणैः प्रतिवादीव निराकरोदिति भावं विशदयता मल्लिनाथेन, नैयायिकाभिमतेष प्रत्यक्षानुमानोपमानशब्दाख्येषु चतुर्षु प्रमाणेषु अन्यतमस्यानुमानप्रमाणस्य तार्किकैरेव वेद्यत्वात्, प्रमाणे प्रतिभा प्रख्याप्यते।

व्याकरणशास्त्र वैदुष्यम्

महाकवेर्माघस्य महावैयाकरणतया, तस्यकाव्यं व्याकरणविशेष बहुलं, सत् आलह्‌ादं जनयति सुधीतल्लजानाम्। तस्यव्याख्यांवितन्वता सूरिणापि प्राकट्यत व्याकरणशास्त्रवैदुष्यम्।

"मुरंद्विषन्नित्यत्र 2-1 द्विषोऽमित्रे" इति सूत्रेण शतृ प्रत्यये "न लोकाव्यये"त्यादिना "द्विषश्शतुर्वा" इति वैकल्पिकष्षष्ठीप्रतिषेधः।" इतिव्याख्याति।

पार्थेनइति रूपस्य साधुतां प्रदर्शयन्नयमेवं वदनि-पार्थेन पृथापुत्रेण "तस्येद"मित्यण्। अन्यथा स्त्रीश्भ्यढक् स्याद्। ततः पार्थेय इतिस्यात. "असः परैः" इत्यत्र विवरणमेष करोति। सनभवतीत्यसः, तस्मादाय एव। 'नञ्' इति नञ् समासः। अत एव "एतत्तदोस्सुलापो" इत्यादिना न सुलोपः।

"वपुषा चतुर्भुजः" 1-70 मुखेनत्रिलोचनः इत्यत्र तृतीयाविभक्ति साधनप्रकारं तस्य पाण्डितीं प्रकाशयति। पश्यत वपुषा मुखेनचेति "येनाङ्गविवार" इति तृतीया। हानिवदाधिक्यस्यापि विकारत्वात्। तथा च वामनः—"हानिवदाधिक्यमप्यङ्गानांविकारः"

भूष्णुरिति 2-9 रूपसाधने—अलंसमर्थोभष्णु भंवनशीलः। "भूष्णु भविष्णु भंविता" इत्यमरः। ग्लाजिस्थश्चग्स्नुः इति ग्स्नुप्रत्ययः।" "क्ङितिचे"त्यत्र गकारप्रश्लेषाग्दुणाभावः। तथा च जयादित्यः— "तत्रैव गकारोऽपि च तत्त्वभूतो निर्दिश्यते।" इति।

ष्ठाधातोः परस्मैपदित्वेन, शतृप्रत्यये उत्तिष्ठन् इति रूपेण भवितव्ये 2-10 उत्तिष्ठमान इति कथमुक्तमितिचेत्-मल्लिनाथस्येदं समाधानम्-उदोनूर्ध्वकर्मणि इत्यात्मनेपदम्। आत्मनेपदित्वेन भवत्येक शानच्।

वृधुधातोरात्मनेपदित्वेन लृटश्शानच्प्रत्यये वर्धिष्यमाणाविति रूपेण भवितव्यम् । आःकथ मिदमुक्तं "वर्त्स्यन्ता''विति 2-10 अत्रेदं सूरेस्समाधानम् वर्त्स्यन्तौ वर्धिष्यमाणौ । लृटस्सद्वा । इति सदादेशे "वृद्भ्यस्स्नसनो''रिति विभाषया परस्मैपदम् । न वृद्भ्यश्चतुर्भ्य इतीडभावः । इति ।

दुःखाकरोतीति रूपंकथमिति प्रश्ने सूरि रेवं समाधत्ते । दुःखाकरोति दुःखमनुभावयतीत्यर्थं । "दुःखात् प्रातिलोम्ये'' इतिडाच्प्रत्ययः ।

रमेरात्मनेपदित्वात् विरेमे इति रूपेण भवितव्ये माघेनविररामेति कथंप्रयुक्तमिति चेत्-मल्लिनाथ एवं समाधत्ते-व्याङ्परिभ्योरम इति परस्मैपदम् इति ।

"खलूक्ताखलुवाचिकं''मित्यत्र, 2-70 "नपादादौ खल्वादय" इति वामनसूत्रेण पादादौ खलोर्निषेधात् उपर्युक्तप्रयोगः कथं सङ्गच्छत इति प्रश्ने-अत्रव्याख्यातैवमाख्याति खलुराद्यः प्रतिषेधे । अन्यो वाक्यालङ्कारे "जिज्ञासानुनये खलु'' इत्युभयत्राप्यमरः । अलं-खल्वोः प्रतिषेधयोः प्राचांक्त्वा इति क्त्वाप्रत्ययः । इह नपादादौ खल्वादय इति निषेधस्य उद्वेजकाभिप्रायत्वात्, नञर्थखलुशब्दस्य अनुद्वेजकत्वात् नञ्वदेव पादादौ प्रयोगो न दुष्यतीति ।

"पुरीमवस्कन्द'' 1-51 इति माघश्लोकव्याख्यानावसरे मल्लिनाथोमहतीं पाण्डितीं प्रादर्शयत् । अमरावतीं पुनः पुनश्चस्कन्द, नन्दनं पुनः पुनर्लुलाव, रत्नानि पुनः पुनर्मुमोष, देवसुन्दरीः पुनःपुनर्जहार एवमहन्यहनि स्वर्गस्य उपद्रवं चकार रावणो द्विषन्निन्द्रमितिसारांशः । पुनःपुनश्चस्कन्द, पुनःपुनर्लुलाव पुनःपुनर्मुमोष पुनःपुनर्जहारेत्यर्थेषु प्रयुक्तानि अवस्कन्द लुनीहि मुषाण हरेतिलोडन्तपदानि, पाणिनीयव्या-

करणपटिष्ठतां माघस्य सूचयन्ति। श्लोकस्यास्यव्याख्यामारचयन् मल्लिनाथोऽपि स्वपाण्डितीं प्राचकटत्-क्रियासमभिहारे लोट् लोटोस्वौ वा च तध्वमोरित्यस्यानुवृत्तौ समुच्चयेऽन्यतरस्यामिति सूत्रेणविकल्पेन कालसामान्येलोट् तस्ययथोपग्रहं सर्वतिङादेशः, हिस्वौ च। प्रकरणा दिनात्वर्थविशेषावसानम् "अतोहेः" इतिसूत्रेण यथायोग्यं हिलुक्। पौनेः पुन्यं भृशार्थो वा क्रियासमभिहारः। अवस्कन्दनादिक्रियाविशेषाणां समुच्चयः क्रियासमभिहारः। तत्सामान्यस्य करोतेः "समुच्चये सामान्य। वचनस्य" इत्यनु प्रयोग श्चक्रे इति। अत्र तिङ्वैचिथात् सौशब्दाख्ये गुणः। "सुपांतिङां परावृत्तिस्सौशब्द"मिति लक्षणात्।

श्रीपदलाञ्छनो माघः। लक्ष्मीपदलाञ्छनो भारविः आनन्द-पदलाञ्छन श्श्रीहर्षः "इति विदितमेव सर्वेषाम् श्रीशब्दप्रयोगविषये मल्लिनाथस्स्वाभिप्रायमेवमाविष्करोति-चमत्कारकारितया मङ्गलाच-रणरूपतया च सर्गान्त्यश्लोकेषु श्रीशब्दप्रमोगः। यथाह भगवान् भाष्य-कारः-मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि च शास्त्राणि प्रथन्ते वीरपुरुषाव्ययुष्मत्पुरुषकाणि च भवन्ति अध्येतारश्चप्रवक्तारो भवन्ति इति।

निधण्टूनां प्रामाण्यम्

न नहि विदितं सर्वेष यत्-अर्थलिङ्गवचन निर्णये निघण्टवः परमं प्रमाणमिति। अस्यांव्यात्त्यायामनेन उपपञ्चदशख्यानिघण्टवस्स्वीकृताः तेषु, अमरः विश्वः यादवः वैजयन्तीकेशवश्चेति षट् पदेपदे प्रमाणतया दत्ताः। तेष्वमरस्य प्रधानस्थानं दत्तम्। निघण्टुष्वमरकोशस्य यादृशं स्थानं, तादृशं नेतरेषामिति कोविदा न न विदन्ति। प्रकटितोव्याख्या-त्राप्यय मेवांशः स्फुटतया।

1-62 लोलशब्दश्चाञ्चल्यार्थेस्तिविदितस्सर्वेषाम्। तथापि माघ स्तृष्णार्थेप्रयुक्तवान्। व्याख्यातायं बहु प्रयत्य "लोलश्चलसतृष्णयो" रित्यमरं प्रमाणयति।

अनेकार्थके विषाणशब्दे-विषाणं पशुशृङ्गेस्यात् 'क्रीडादिरददन्त-योरितिविश्वं प्रदर्शयति।

मुग्धशब्दं श्रुतवतां, मूढत्वमेवार्थ इति प्रथमतो विभाति। माघः नव इत्यर्थे 1-47 मुग्धशब्दप्रयुङ्क्ते। "मुग्धस्सौम्ये नवे मूढे" इति वैजय-न्तीमत्र प्रमाणयन् नवार्थकत्व बोधयति व्याख्याता-मुग्धौ नवौ यौ कान्तास्तनौ इति। मुग्धाक्षीत्यत्र सौन्दर्यार्थकत्वमपि।

कव्लाशब्दस्य बहुलार्थकतया, विदितमाघाशयोमल्लिनाथ: 1-59 कलासमग्रेणेत्यत्र कलाशब्दमेवं विवृणोति। "कलाभिष्षोडशांशैः शिल्पविद्याभिश्च समग्रेण सम्पूर्णेन।" "कालेशिल्पेवित्तवृद्धौ चन्द्रांशे कलने कला" इति वैजयन्ती।

क्षपानाथ इव श्रीकृष्णः पुष्यरथमधिरूढवानित्यत्र पुष्यरथशब्द मेवं व्याख्यातवान्। पुष्यरथं क्रीडारथं-असौ पुष्यरथश्चक्रयानं न सम-राय यत् इत्यमरः। पुष्यो रथइव पुष्यरथः। पुष्यनक्षत्रं सर्वार्थसाधकम् पुष्यस्सर्वार्थसाधक इति शास्त्रात्। पुष्यनक्षत्रमनिषिद्धगमनंच, अधिष्ठा नशक्ते निरङ्कुशत्वात् "पुष्यो हस्तो मैत्रमप्याश्विनंच" चत्वार्यह्निस्सर्व-दिग्द्वारकाणि इति शास्त्रादिति भावः। क्षिप्रंक्षिप्रगामिनं अन्यत्र क्षिप्र-नामकम्। क्षिप्रंचाश्विदिनेशपुष्य"मितिशास्त्रात्। उपर्युक्तव्यानदर्श नेन व्याख्यातुर्ज्योतिश्शास्त्रपरिचयः विमर्शनाशक्तिश्च स्फुटीभवतः।

भ्रममागतैरिति पदं श्रुतवतां-भ्रमं अप्रमाजन्यं ज्ञानं अगतैरित्यर्थो गोचरीभवति। अत्र "भ्रमाश्च जलनिर्गमा" इत्यमरं प्रमाणयति।

श्यामाशब्दो यौवनमध्यस्थावाचक इति जानन्ति विद्वांसः। वत्र सूरिःश्यामायौवनमध्यस्थेत्येत्युत्पलं प्रमाणयति।

तत्रभवान् अत्रभवान् 14-2 इत्यनयोः पूज्यतावाचकत्वं जानन्ति प्रमाणंतु न जानन्ति। तत्रभवान् सज्जनस्सुजनश्च मल्लिनाथः "पूज्यस्तत्रभवानिति सज्जनं प्रमाणयति। एवं बहूनां निघण्टूनां साहाय्येनार्थनिर्णयति।

पूर्वगाथालहरी

तत्रभवान् मल्लिनाथस्सर्वङ्कषायां बह्वीः पूर्वगाथा उल्लिखति।

पुराकिल रावणः काम्येकर्मणि पशुपतिप्रीणनाय नवशिरांस्यग्नौ हुत्वा, दशमारम्भे सन्तुष्टात्तस्मात् त्रैलोकयाधिपत्यं वव्रे 1-49

पुराकिल भगवान् भक्तवत्सलो धूर्जटिः बाणप्रेम्णा बाणाभिधावनं हरिमभियुज्यनिर्जित इति पौराणिकाः कथयन्ति। 3-61

पुराकिल बाल्ये कृष्णः शकटरूपधारिणं शकटासुरं पादघातेन पातयामासेति पौराणिकी कथा। 11-33

पुराकिल भगवान् सत्यभामाप्रीतये, बलादिन्द्रलोकादपहृत्य पारिजातं निजगृहेषुआरोपितवानिति कथात्रानुसन्धेया। 13-12

एवं विधाभिर्मनोहराभिः पूर्वगाथाभिरलंकृतवान् स्वटीकाम्।

भावविवरणम्

भावाविष्करणायायं सम्यक्चेष्टते। हृदयङ्गमैभावैर्विदुषां मनोविनोदयति।

कृच्छ्रलभ्यास्सन्तः पूज्या इत्यर्थः । 1-13

गजघातिनर्सिंसहस्य मृगवर्णनमिव महासुरहन्तुः कंसादिक्षुद्रनृपवर्णनंतिरस्कारएवेत्यर्थः । 1-39

दिगधीशानामपि सर्वस्वहारित्वात्, तदौद्धत्यस्य प्राकट्यमिति भावः । 1-44

सन्ध्यावन्दनेपि दिङ्नियमं परित्यज्य, तदागमनभयात् तस्यै दिशे देवैर्नमस्कारः कृतइतिभावः । 1-46

मानिनः प्राणात्ययेऽपि मानंन मुञ्चन्तीतिभावः । अनन्यप्रसादलब्धैश्वर्ये मयि कथं याचकैस्तुल्यतेति गर्वाद्धसतीत्यर्थः । 1-66

समर सुरतयोस्समरस इतिभावः । 2-14

मूषकग्रहणाय शिखरिस्वननं परिहासास्पदं भवतीतिभावः । 2-78

एव मस्यभावविस्ष्करणरीतिः सुरुचिरा दृश्यते। अनेकेषुस्थानेषु ।

श्रुत्यादिभ्यः प्रमाणस्वीकारः

शब्दप्रधानेभ्यः प्रभुसम्मितेभ्यो वेदेभ्यः, उक्तमर्थं द्रढयितुं प्रमाणान्युपन्यस्तानि ।

नारदप्रणीते श्रीकृष्णस्तवे "उद्रिक्तविषयाभिलाषप्रतिरोधकं अतिदुर्गमं अपवर्गं कान्तारं चोपेयुषः सुमनसो धीरस्यच त्वमेवनिरपायशयः अग्रभूमिः प्रायस्थानमिति वर्णनपरे–" न स पुनरावर्तते "इति" सोऽहं । "तमेवविदित्वा अति मृत्युमेति नान्यः पन्था विद्यतेऽयनाय इति विश्रुता श्रुतयः प्रमाणतया स्वीकृताः 1-32

उदासितारमिति श्लोकार्थोपवर्णने मूलप्रकृतिः महदाद्याः प्रकृति-

विकृतयस्सप्त । षोडशकश्चविकारो, न प्रकृतिर्नविकृतिः पुरुषः ।। इति सांख्यकारिका, "अजामेकांलोहितशुल्क कृष्णाम्" इत्यादिश्रुतिश्च प्रमाणतया उपन्यस्ते ।

सहस्रसंख्याकैश्शिरोभिस्सहिते सूर्याचद्रमोभ्यां नयनवतिनिधिगर्भे रैवतके माघेन वर्णिते मल्लिनाथस्तत्र सहस्रशीर्षापुरुष इति श्रुतिं प्रमाणयति ।

एवं धर्ममूला श्श्रुतयस्तत्र तत्र तेनोदाहृताः ।

शुतिमूलकास्स्मृतयोऽपि बहवउदाहृताः ।

गृहागतं नारदं दृष्ट्वा श्रीकृष्ण आसनादुदतिष्ठत् । इदानीमपि गृहमागते अभ्यागते गृहमेधिन आसनेभ्य उत्तिष्ठन्ति । मल्लिनाथस्तत्र प्रमाणमुपन्यस्यति–ऊर्ध्वंप्राणाव्युत्क्रामन्तियूनः स्यविरआयति । 1-12 प्रत्युत्थानाभिवादाभ्यां पुनस्तान् प्रतिपद्यत इति 12-56 गुरूनपि गिरीन् हरिवाहिनी अतिचक्रामेतिमाघेन कथिते गुर्वतिक्रमोऽपि केषुचित्सन्दर्भेषूचित एवेति मल्लिनाथस्यस्मृतिपथमेकास्मृतिरारोहति ।

"गुरोरप्यवलिप्तस्यकार्याकार्यमजानतः ।

उत्पथप्रतिपन्नस्य परित्यागो विधीयते ॥" ति ।

14-9 क्षत्रियेण स्वपतेयं (वित्तं) समुपार्जनीयम् समुपार्जितं च सम्यक्पालनीयम् । पालितं च पात्रे दातव्यमिति माघेनाभिहिते–तत्र मल्लिनाथः प्राचां वचनं प्रमाणतयोपन्यस्यति ।

"पालितं वर्धयेन्नित्यं वृद्धंपात्रेषुनिर्वदेत् । "

स्मृतिषु सर्वदासर्वथा च स्मरणीया स्मृति र्मनुस्मृतिः । इयंमल्लिनाथस्य स्मृतिमुपगता बहुशः । 1-72 "सतीकवथोषित्प्रकृतिस्सुनिश्चला

पुमांसमभ्येतिभवान्तरेष्वपि" इति उपमानोपमेयभावपुरस्कृतं महाकवे-र्माघस्यार्थान्तरन्यासं विवृण्वानो मल्लिनाथः स्मरति स्मृतिमिमाम् ।

"पतिं या नाभिचरति मनोवाक्कायसंयुता ।
सा भर्तृलोकानाप्नोति सद्भिःस्साध्वीतिचोच्यते ॥"

उद्धवबलरामश्रीकृष्णास्सभामासेदुर्मन्त्रकरणाय । मन्त्रकरणाय महतां सम्मेलनमुचितमेवेति समर्थयति मल्लिनाथः ।

"गिरिपृष्ठंसमारुह्य प्रासादंवारहोगतः ।
अरण्येनिश्शलाकेवामन्त्रयेद्भावभावितौ ॥"

अलङ्कारशास्त्रपाण्डित्यम्

तत्रभवान् मल्लिनाथः सहृदायनन्दसधायिन्यलङ्कारशास्त्रे कृत-भूरिक्षम इति न तिरोहितंतिदुषाम् ॥ आचार्य दण्डिनं काव्यालङ्कारसूत्र प्रणेतारंवामन मलङ्कारसर्वस्वकारं रुय्यक पीयूषवर्षं जयदेवं सरस्वत्य-परावतारं मम्मटभट्टं, ध्वनिविरोधिन महिमभट्टं ध्वनिकृतमानन्दवर्धनं च सगौरवं स्मरति । रसभावगुणालङ्काररीतीनां लक्षणानि विलिख्य लक्ष्येषु योजयति च यथावसरम् । प्रतिश्लोकमलङ्कारान ध्वनिं च महतायत्नेन साधयति अर्थालङ्काराणां शब्दालङ्कारणां च स्वरूपं निरूपयति सप्रमाणम् । अलङ्कारशास्त्रतसिद्धस्य बन्धकवित्वस्य वेदितायमिति सर्वङ्कषादर्शनेन विज्ञायते विद्वद्वरैः । अतो माघ इव मल्लिनाथोऽपि आलङ्कारिकेष्वग्रगण्य इति वक्तुं शक्यते ।

मीमांसाशास्त्रपाण्डित्यम्

चतुर्दशसर्गस्य व्याख्या वितन्वतानेन मीमांसाशास्त्रे प्रकटितं सुमहत् पाण्डित्यम्। कोनाम याग इति प्रश्ने–"देवतोद्देन द्रव्यत्यागो याग" इति स्मरति लक्षणम् । ऋत्विजायागे क्रियमाणेऽपि, तस्यकर्तृता राज्ञि समभवदित्यंशे भगवन्तं जैमिनिं प्रमाणयति ।

"अन्या वा स्यात्परिक्रिया स्नानात्सत्यप्यात्मने पदे" इति

दान होम यजनानि इति पद विवृण्वता मल्लिनाथेनैवमुक्तम्— स्वकीयस्य द्रव्यस्य स्वस्वत्वनिवृत्तिपूर्वकं परस्वत्वापादनं दानम्। देवतोद्देशेन अग्नौ हविषः प्रक्षेपो होमः। हुतस्य देवतोद्देशेन वाङ्मनसाभ्यां न ममेति त्यागो यागः। चतुर्दश पञ्चदशसर्गयो स्सर्वङ्कषा, मीमांसाशास्त्र पाण्डित्यमनुमापयति कार्त्स्न्येन।

सङ्गीतशास्त्रपाण्डित्यम्

सङ्गीतशास्त्रे मल्लिनाथस्य महत् पाण्डित्यमस्तीति विज्ञायते रणद्भिरिति 1-10 श्लोकस्यव्याख्यां विरचयन्नयं स्वरश्रुति ग्रामविशेष मूर्छनादिसङ्गीतशास्त्रप्रसिद्धपारिभाषिकपदानां विवरणं सप्रमाणं करोति। अनवद्यवाद्यति 13-66 श्लोके, नृत्तगीतवाद्यत्रयरूपे, सङ्गीते सात्विकाङ्गिकाभिनयप्रदर्शन पुरस्सरं मधुरनृत्यस्य लास्यस्य वर्णनपरे, दशरूपको क्तलक्षणप्रदर्शनात् प्रतीमो वयं भरतनाटयेस्य महतीप्रीतिरस्तीति।

प्रकीर्णकम्

अश्वानां लक्षणानि गतिविशेषान्, हस्तिनां लक्षणानि प्रभेदांश्च ज्ञातुं बहवो ग्रन्था अनेनपठिता। आवर्तिन 5-4 इति श्लोके।

"द्वावुरस्यौ शिरस्यौ द्वौ द्वौ रन्ध्रोपरन्ध्रयोः।
एको भाले हयपाने च दशावर्ता ध्रुवा स्स्मृताः॥

इति आवर्तप्रभेदाः कथिताः। आवर्तोरोमसंस्थानम्। हयानां गतिविशेषा अप्यनेन सम्यग्व्याख्याताः। भोजादीनां साहाय्येन। महत्या व्युत्पत्त्या अप्रतिमया प्रतिभया च, सर्वङ्कषां विरच्य मल्लिनाथो व्याख्यातृशिरोमणिरिति महतीं कीर्तिं लेभे। आमुखोक्तैः व्याख्यानारम्भेषु लिखितैः हृद्यैः पद्यैश्च महाकविरिति बिरुदं च लब्धवान्।

धर्मसूरेः मल्लिनाथस्याधमर्णत्वम्

बी. नरसिंहाचार्यः
संस्कृतविभागः, उस्मानिया विश्व-
विद्यालयः, हैदराबाद ।

विशेषख्यातभिः स्वव्याख्याभि महामहोपाध्यायः मल्लिनाथसूरिः संस्कृतसाहित्यविवेक्षूणां, विदुषां च प्रातःस्मरणीय वर्तते मल्लिनाथः स्वव्याख्यासु सिंगभूपालस्य 'रसार्णवसुधाकर', कुमारगिरेः'वसंतराजीयं' च प्रमाणतया उदाहरति । प्रौढदेवरायैः कनकाभिषेकेन सत्कृतश्चायं "वैश्य वंशसुधाकर कर्ता ।"बहुधा बहुभिर्निर्णीतस्यास्य कालस्य समन्वयरूपेण मल्लिनाथः ख्री. 1350-1430 मध्यकाले स्वजनुषा प्रदेशमिममलंचकार' इति वक्तुं पार्यते ।

साहित्यरन्ताकराद्यनेक ग्रन्थजणेता, भाष्यरत्नप्रभादिव्याख्याविख्यातकीर्तिः वाराणसीवंशभवः धर्मसूरिः गुण्टूरुमण्डले ख्री. 1446-1600 मध्यकाले अवर्तत । कालनिर्णयकप्रमाणानि-धर्मसूरिः विद्यानाथस्य सहोक्तिलक्षणं नामग्राहं खण्डयामास । विद्याधरस्य एकावलीतः स्वरत्नाकरे बहुशः उदाजहार । रसार्णवसुधाकराच्च श्लोकमुदाहरत् । मल्लिनाथस्य तरलादपि विषयाननुससार । अतः धर्मसूरिः मल्लिनाथ परवर्ती इति निश्चप्रचं वचः । अप्पकविः, रसमञ्जरीव्याख्यारूपस्य 'आमोदस्य' कर्ता गुरजाल रङ्गशायी च साहित्यरन्त्राकरादुदाजहृतुः । एवं धर्मसूरिः ख्री. 1600 भवात् रङ्गशायिनः, अप्पकवेश्च पूर्ववर्ती इत्यत्र न केषां विमनस्कता ।

मल्लिनाथस्य व्याख्यासु 'तरल:' एक एव अलंकारग्रन्थस्योपरि व्याख्या। एकावलीग्रन्थ: मल्लिनाथस्य तरलश्च यथा सुप्रसिद्धौ, तथा न सुपरिचितौ-विद्वल्लोके पठन पाठनादिषु अविद्यमानत्वात, पाठयग्र-न्थरूपेणानियमितत्वाच्च। नायमद्यतनीया स्थितिः परं तु मल्लिनाथ-स्यैव समये एकावल्याः प्रचारः लुप्तोऽजनि। मल्लिनाथः सरलं तरलं निर्माय एकावलीं पुनःप्रचारपदवीं प्रापयामास। अमुमेव विषयं एका-वलीव्याख्या प्रास्ताविकश्लोकेषु एवं स्पष्टींचकार मल्लिनाथ:

"एकावली गुणवतीयमलंक्रियापि
यद्वैशसादजनि कोशगृहेषु गुप्ता।
तेनोद्वलेन (तेनोज्ज्वलेन) तरलेन समेत्य धन्यै:
कण्ठेषु चाद्य हृदयेषु च धार्यतां सा॥ त. श्लो. 6 इति

परं मल्लिनाथः नामंस्त यत् तेनैव नृशंसेन तरलोऽपि कोशगृहेषु गुप्तो निक्षिप्तो प्रचारलुप्तोऽपि च भवेदिति। महदिदं विषादस्थानं यत मल्लिनाथस्य इतरा व्याख्या इव तरलः प्रख्यातिं नैवाप इति। धर्मसूरि: एकावलीं तरलं च आमूलाग्रं क्षुण्णं च अध्यैष्ट। साहित्यरत्नाकरे तर-लेन सह तत्र तत्र विषयसादृश्यं, विवरणसाम्यं च दरीदृश्यते। क्वचि-च्चतरलात् पङ्क्तयः यथातथं, क्वचित् किंचित् परिवार्य समानार्थकपदैः उद्धृत्य साहित्यरत्नाकरे संग्रथितास्सन्ति।

साहित्यरत्नाकरे ऐदंप्राथम्येन काव्यस्य मीमांस्यत्वं उपादेयत्वं च विस्तरेण प्रतिपाद्य, तस्य अध्ययनविधिमूलकत्व च व्यवस्थापितम्। श्लोकानां व्याख्यानावसरे धर्मसूरिः मल्लिनाथ इव व्याकरणालंकरणादि विशेषान् अपि विशदीकरोति। काव्यप्रयोजनानां कथनावसरे एकाव-लीतः "विश्वोल्लघनजाङ्घिकीमि त्यादि श्लोकं, तरले समुद्धृतं सेतुबंधस्थं 'परिवर्धते इत्यादि च धर्मसूरिः उदाहरति। तस्मिन्नवसरे' काव्यालापां

श्च वर्जयेत्" इति स्मृतिरनुप्रसक्ता। तदा धर्मसूरिणा तरलस्थं– "निषेधो मुद्राराक्षसाद्यसत्काव्यविषयतया व्यवस्थापनीयः। अन्यथा रामायणादीनामपि हेयत्वप्रसंगादिति" वाक्यद्वयं यथावदुध्दृतमस्ति। अनन्तरं काव्यस्य उपदेशान्तर वैलक्षण्यप्रदर्शनावसरे धर्मसूरेः साहित्यरत्नाकरे एवं चर्चा वर्तते– "तदेव शासनाच्छास्त्रम्। तदुक्तमाचार्यैः– "प्रवृत्तिर्वा निवृत्तिर्वा नित्येन कृतकेन वा। पुंसां येनोपदिश्येत तच्छास्त्रमभिधीयते॥ इति। स चोपदेशः त्रिविधः– प्रभुसंमितः, सुहृत्संमितः, कान्तासंमितश्चेति। तत्र प्रभुसंमितो वेदः शब्दप्रधानत्वात्। तथा हि–यथा लोकें प्रभुर्वाङ्मात्रेण पुंसः प्रवर्तयति निवर्तयति च, अन्यथा दंडमापादयति, एवं वेदोऽपि शब्दप्राधान्येनैव नियोज्यं यथायथं प्रवर्तयति निवर्तयति च। विपक्षे प्रत्यवायं सूचयति। अत्रार्थस्य प्राधान्यमात्रपरित्यागः, न तु स्वरूपत्यागः। तथात्वेतून्मत्तप्रलपितवदप्रवर्तकतैव वेदस्य स्यात् इति।" (सा. र. पृ. 67-68) पश्यत इयं चर्चा कथं तरलेन साम्यं भजतीति। "तरल पृ. 13. शासनाच्छास्त्रमुपदेशः कर्तव्याकर्तव्यबोधकं पौरुषेयमपौरुषेयं वा वाक्यम्। तदुक्तम्–प्रवृत्तिर्वा निवृत्तिर्वा नित्येन कृतकेन वा। पुंसां येनोपदिश्येत तच्छास्त्रमभिधीयते॥ इति। तच्छास्त्रं त्रिधा प्रभुसंमितं, मित्रसंमितं कान्तासंमितं चेति। तत्र त्रयाणां मध्ये यद्वेदाख्यं शास्त्रं तत् प्रभुसंमितं राजतुल्यमित्यर्थः। यथा प्रभुर्वाङ्मात्रेण पुरुषं प्रवर्तयति निवर्तयति च विपक्षे दण्डयति चैवं वेदोऽपि विधिशब्देनैव पुंसां प्रवृत्तिनिवृत्तिहेतुर्विपक्षे प्रत्यवायं चापादयति। शब्दप्राधान्यमित्यनेनार्थस्य प्राधान्यमात्रनिर्देशः। स्वरूपनिषेधे तून्मत्तप्रलपितवदप्रवर्तकत्वापातात्। इति।"

परीक्षध्वमधुना यथातथमुध्दृताः पङ्क्तयः। तरल पृ 14. "शब्दश्चात्र विधिप्रत्ययोपलक्षितं वाक्यं तस्य प्राधान्यं प्रवर्तकत्वम्। ननु पुरुषप्रवृत्तिरूपभावनां विदधानः प्रत्यय एव प्रवर्तकः तस्य प्रेरणार्थे विधानात् तत् कथं वाक्यं प्रवर्तकमिति चेदहो पल्लवग्राहिपांडित्यमायुष्मतो येन प्रत्ययः प्रवर्तक इत्याकलयता स च विशिष्ट इति नाकलितम्। तदाकलने वाक्यमेव प्रवर्तकमित्यपि किं नाकलयेः? तथा हि; न हि भावयेदित्युक्ते

कश्चित् प्रवर्तते किंत्विदमनेनैवं भावयेदिति । तथा सत्यंशत्रयविशिष्ट-भावनाभिधायी प्रत्ययः प्रवर्तक इति वाक्यमेव प्रवर्तकमित्युक्तं भवति । तदुक्तमाचार्यैः कारिकायाम्–किमाद्यापेक्षितैः पूर्णः समर्थः प्रत्ययो विधौ । तेन प्रवर्तकं वाक्यं शास्त्रेऽस्मिन् चोदनोच्यते ।। पठ्यते इति पाठो वेदः तस्यान्यथापाठेऽन्यथोच्चारणे दुरितं अन्यथानुष्ठानेऽननुष्ठाने वा प्रत्यवाय इति किमु वक्तव्यम् । अध्ययनविधेः फलवदर्थविबोधपर्यवसितत्वादिति । तस्माच्छब्दप्रधानं ततः प्रभुसंमितं वेदाख्यं शास्त्रमित्यर्थः । [अर्थप्रधानं शास्त्रं मित्रसंमितमित्यर्थः । अत्रार्थो वाक्यार्थो न पदार्थस्तस्याप्रवर्तकत्वात् । प्राधान्यं च प्रवर्तकत्वमेव । इतिहासादयो न वेदवदेवं कुर्यात् इति विधिबलेन पुरुषं प्रवर्तयन्ति किन्तु पूर्वपुरुषचरितवर्णनामुखेन सुहृदिव युक्तिभिरनुनीय प्रवर्तयन्तीत्यर्थप्राधान्यमित्यर्थः । इदानीमनेन भागेन सवंदतं साहित्यरत्नाकरस्थं ग्रन्थं विदांकुर्वन्तु – सा. र. पृ. 68 "शब्दश्चात्र विधिप्रत्ययोपलक्षितं वाक्यं, तस्य प्राधान्यं प्रवर्तकत्वम् । तेन शब्दप्रधानं शास्त्रं प्रभुसंमितमिति लक्षणमुक्तं भवति । (अधोरेखांकितः नूतनतया रचितः भागः) ननु पुरुषप्रवृत्तिरूपभावनां विदधानः प्रत्यय एव प्रवर्तकः । तस्य प्रेरणार्थे विधानात् । तत् कथं वाक्यं प्रवर्तकमिति चेत् प्रत्ययः प्रवर्तक इत्याकलयन् स च विशिष्ट भावनाभिधायीति किं नाचकलद्भवान् ? तथाकलने वाक्यमेव प्रवर्तकमिति किं नाज्ञासीत् ? न हि भावयेदित्युक्ते कश्चित् प्रवर्तते । किंतु इदमनेनैवं भावयेदिति । तथा सत्यंशत्रयविशिष्टभावनाभिधायी प्रत्ययः प्रवर्तक इति वाक्यमेव प्रवर्तकमित्युक्तं भवति । इदमुदितं आचार्यैः–"किमाद्यापेक्षितैः पूर्णः समर्थः प्रत्ययो विधौ । येन प्रवर्तकं वाक्यं शास्त्रेऽस्मिंश्चोदनोच्यते" ।। इति । अतो वेदवाक्यानामन्यथापाठे अपाठे वा अन्यथानुष्ठानेऽननुष्ठाने वा महान् प्रत्यवायः । अध्ययनविधेः फलवदर्थावबोधपर्यन्तत्वात् । तेन प्रभुसंमितो वेदः । सुहृत्संमितः पुराणादिः अर्थप्रधानत्वात् । अत्रार्थो वाक्यार्थो न पदार्थः, तस्याप्रवर्तकत्वात् । तत्प्राधान्यं च प्रवर्तकत्वमेव । अर्थवादात्मका पुराणादयो वेदवत् 'एतदेवं कुर्यात्' इति विधिबलेन पुरुषं प्रवर्तयितुं नेशते ।

किन्तु प्राचीनपुरुषकथाशरीरवर्णनद्वारा सुहृद इव युक्तिभिरनुनीय प्रवर्तयन्ति ।" अत्रान्यो विषयः प्रस्फुटो भवति यत् मल्लिनाथः सत्यमेव पदवाक्यप्रमाणपारावारीण इति धर्मसूरिश्च 'विवरणगुरुवाक्सांख्यमुख्यागमानां' इति स्वोक्तरीत्या मीमांसादिषु व्याख्यानिर्माता आसीदिति ।

अन्योऽयं दृष्टान्तः सादृश्यस्य प्रस्तूयते । अयं तृतीयोपदेशभूतस्य काव्यस्य उपदेशान्तरवैलक्षण्यप्रतिपादको ग्रन्थभागः । प्रथमं तरलस्थः ग्रन्थः तरल पृ. 15 "ध्वनिप्रधानं शास्त्रं कान्तासंमितमिति लक्षणं तच्च काव्यमित्यर्थः । यथा कान्ता कटाक्षवीक्षणमन्दहासमधुरभाषणादिभिः पुरुषं रञ्जयन्ती व्यञ्जनाव्यापारेणैव सर्वं कारयति एव काव्यकलापि शब्दार्थोभयशक्तिमूलया व्यञ्जनावृत्त्या सुहृदयहृदयाह्लादिकया चमत्कुर्वती रामादिवद्वर्तितव्यं जनेन, न रावणादिवदिति ध्वनयन्ती सरसतामापाद्य पुंसः कर्तव्ये प्रवर्तयति निवर्तयति चाकर्तव्यादिति" । इदानीं साहित्यरत्नाकरस्थोऽयं ग्रन्थः । सा. र. पृ. 72-73. 'ध्वनिप्रधानं शास्त्रं तु कान्तासंमितमुच्यते' इति लक्षणम् । यथा हि कान्ताः (तरले एकवचनप्रयोगः) कटाक्षवीक्षणादिभिः (मन्दहासभाषणादिकं इति नोक्तं) पुरुषं रञ्जयन्ति, व्यञ्जनाव्यापारेणैव सर्वं कार्यं कारयन्ति, एवं काव्यविद्यापि (तरले काव्यकलापि इति पाठः) शब्दार्थतदुभयशक्तिमूलया व्यञ्जनावृत्त्या सहृदयहृदयानन्दिन्या (तरले—आह्लादिकयेति पाठः) लोकोत्तरचमत्कारकारिण्या रामादिवद्वर्तितव्यं न रावणादिवत् इति व्यञ्जयन्ती सरसतामापाद्यैव पुंसः कर्तव्ये प्रवर्तयति निवर्तयति चाकर्तव्यादिति" ।

नैतावदेव अपि तु तृतीयतरङ्गस्य अवतारिका तरलस्थग्रन्थेन संवदति । यथा सा. रत्नाकरः पृ. 208 "एवं वाच्यवाचकतद्वृत्तीर्निरूप्य सम्प्रति तन्मूलकतया लक्ष्यलक्षकतद्वृत्तीर्निरूपयितुमर्थज्ञानस्य शब्दज्ञानपूर्वकत्वात् पूर्वं शब्दं निरूपयति" इति । अयमेव ग्रन्थभागः तरले "एवं वाच्यवाचकतद्वृत्तिं निरूप्य सम्प्रति तन्मूलकतया लक्ष्यलक्षकतद्वृत्तिं निरूपयितुमर्थज्ञानस्य शब्दज्ञानपूर्णकत्वात् पूर्वं शब्दं निरूपयति" इति । अत्र वृत्तीः—

वृत्तिः इति एकवचनबहुवचनादन्यो भेदो नास्ति । एवं लक्षकत्वविचारेऽपि परिष्कारपद्धतिर्द्वयोरप्येकैव वरीवर्ति । सा चेत्थम् । तरले पृ. 62 ननु किं शब्दो लक्षकः अर्थो वा । नाद्यः । शब्दस्य स्वार्थप्रकाशनमात्रोपरतव्यापारस्य पुनर्व्यापारान्तरायोगात् । न द्वितीयः । अर्थस्य लक्षकत्वे शब्दव्यापारो लक्षणेति कथम् ? तत्राह । वाच्यधर्मस्य वाचके समारोपात् तथा व्यपदेश इति भावः । नन्वर्थस्यैव लक्षकत्वे कथमजहत्स्वार्थायाः स्वार्थांशे वृत्तिविरोधाभावः । केवलसमुदायभेदेन लक्ष्यलक्षकभेदसद्भावादिति संक्षेपः ।" समीक्षध्वं साहित्यरत्नाकरे विद्यमानं सदृशं ग्रन्थभागम् । साहित्यरत्नाकर : पृ. संख्या 211-212. ननु शब्दस्य लक्षकत्वमर्थस्य वा ? नाद्यः; तस्य स्वार्थप्रकाशनमात्रेणोपरतव्यापारस्य पुनर्व्यापारान्तरायोगात् । न द्वितीयः; अर्थस्य लक्षकत्वे 'शब्दव्यापारो लक्षणा' इत्यङ्गीकारविरोधात् इतिचेत्; उच्यते । वाच्यार्थव्यापार एव लक्षणा वाचके समारोप्यते । नन्वर्थस्यैव लक्षकत्वे कथमजहत्स्वार्थायां स्वार्थांशे वृत्तिविरोधाभावः? केवलसमुदायभेदेन लक्ष्यलक्षकभेदसद्भावादित्यवेहि ' इति । न केवलं विवरणे अपि तु लक्षणायाः विभजने च धर्मसूरेः रत्नाकरे तरलस्य प्रभावः असदृशोऽस्ति । यथा तरले पृ. 63 ' फलतो लक्षणा तु प्रथमं शुद्धा, सारोपा, साध्यवसाना चेति त्रिधा । तत्राद्या जहदादिभेदेन त्रेधा, इतरे तु प्रत्येकं गौणी शुद्धा चेति द्विविधे इति विभागं सिद्धवत्कृत्य क्रमेण तासां लक्षणोदाहरणे दर्शयन्नादौ जहत्स्वार्थां लक्षयति शब्द इत्यादि । शब्दो गङ्गादिशब्दः परार्थं परस्य तटादेर्घोषाद्यधिकरणत्वसिध्दर्थं आत्मानमर्पयति स्वार्थं हित्वा तटाद्यर्थे प्रवर्तयति तदा स्वार्थत्यागाज्जहत्स्वार्थेत्यन्वर्थसञ्ज्ञेत्यर्थः ।" साहित्यरत्नाकर : पृ. सं. 228 प्रयोजनलक्षणा तु प्रथमं शुद्धा, सारोपा, साध्यवसाना च इति त्रिविधा । तत्राद्या जहत्स्वार्था, अजहत्स्वार्था जहदजहत्स्वार्था चेति त्रिधा । इतरे तु प्रत्येकं गौणी शुद्धा चेति द्विविधेति फलतो लक्षणा सप्तविधेति विभागं सिद्धवत्कृत्य क्रमेण तासां लक्षणोदाहरणे दर्शयन्नादौ जहत्स्वार्थां लक्षयति" इति । यदा गंगादिशब्दः परस्य तटादेः घोषाद्यधिकरणत्वसिद्धये स्वार्थं हित्वा स्वात्मानं तटाद्यर्थे प्रवर्तयति तदा स्वार्थत्यागाज्जहत्स्वार्थाऽन्वर्थसंज्ञेत्यर्थः ।" इति ।

विविधानां 'लक्षणानां' भिन्नभिन्नालंकारमूलत्वविचारेऽपि तरलस्य प्रभाव: साहित्यरत्नाकरे दरीदृश्यते । एवं शुद्धालक्षणायाः तृतीयप्रभेद-रूपायाः जहदजहत्स्वार्थायाः निरूपणे व्यवस्थापने च धर्मसूरिः मल्लिनाथं छायेवानुसरति । प्रथमं अस्याः प्रतिपादकः भागः तरलात् पृ. सं. 67 "अयमाशयः – किमिह लक्षणैव नास्तीति विवक्षया द्विधैवेत्युक्तं परैरुत सत्यपि तत्रैवान्तर्भूतेति विवक्षया वा नाद्यः । विचारासहत्वात् । तथाहि-यावता शब्देन यावानर्थः प्रतीयते तावानेव तस्य स्वार्थो न न्यूनो नाधि-कश्च प्रतीयते । सोऽयं वारणेन्द्र इति पदत्रयेणापाततस्तावत्तत्तेदन्ताविशिष्टं वस्तु इति तावानस्यार्थः । अत्र तत्तांशबाधे न्यूनोऽयमस्यार्थः कथमनेना-भिधीयेत तथापि प्रतीयत इत्यकामेनापि तत्तोपलक्षितमिदन्तविशिष्टं वस्तु लक्ष्यत इत्याश्रयणीयमेवेति कथमत्र नास्ति लक्षणा । नापि द्वितीयः । न तावादियं जहत्स्वार्था । कुन्ताः प्रविशन्तीतिवत् स्वसिद्धये परानाक्षेपात् । किं तु स्वार्थस्यैवांशभेदेन हानाहानाभ्यामुभयवैलक्षण्यादन्यैवेति सुष्ठूक्तं त्रिविधेति – वेदान्तिनश्चैतामुपजीव्य महावाक्यार्थं वर्णयन्ति ।" आकल-यन्तु भवन्तोऽधुना साहित्यरत्नाकरादयमेव जहदजहल्लक्षणानिरूपकव्यव-स्थापकं वाक्यसमुदायं – सा. रत्नाकर : पृ सं. 239–241. "किमिह लक्षणैव नास्तीति विवक्षया परेण नोदाहृता? सत्यप्युक्तविधद्वय एवान्तर्भवतीति वा ? नाद्यः विचारासहत्वात् । तथाहि; यावता शब्देन यावानर्थः प्रतीयते, तावानेव तस्यार्थः न न्यूनो नाधिकश्चेति स्थितिः । सोऽयं देवदत्त इत्यत्र (तरले–वारणेंद्र इति पाठः) तत्तेदन्ताविशिष्टमवभासत इति तावानेवार्थः । तत्र तत्तांशबाधे न्यूनमिदमस्वार्थं इति कथमनेनाभिधीयेत । प्रतीयमानं च तत् यया कयाचन वृत्त्या प्रतिपादनीयम् । तेन तत्तोपलक्षितमिदन्ताघटितमेव देवदत्तस्वरूपमभिधाकुण्ठनाल्लक्षणया बोध्यमित्यकामेनाप्यभ्युपगन्तव्य-मेवेति कथमत्र नास्ति लक्षणा । नापि द्वितीयः । न तावदियं जहत्स्वार्था । इयं हि तत्तांशमात्रमेव जहाति । न तु लक्षणलक्षणावत् परार्थं स्वार्थं सकलमपि समर्पयति । नाप्यजहत्स्वार्था – स्वसिद्धये पराक्षेपाभावात् किन्तु स्वार्थस्यैवांशभेदेन हानाहानाभ्यामुभयवैलक्षण्यात्" इत्यादि ।

एवं धर्मसूरिः तरलात् एकवलीतश्च विषयान् उपादत्त । तरलं च विषयविवरणसरण्यां मीमांसाप्रवणत्वे च यथेष्टमनुससार । उपरिष्टादुक्तोदाहरणेभ्यश्च कथं बह्व्यः पङ्क्तयः यथानुपूर्वीकतया, काश्चन परिवर्तित (वर्धित) रूपेण तरलात् स्वीकृत्य स्वकृतिं धर्मसूरिरुपबृंहितवानिति ज्ञायते। प्राचीनः नैयायिकवर्यः जयन्तः 'कुतो वा नूतनं वस्तु वयमुत्प्रेक्षितुं क्षमाः। वचोविन्यासवैचित्र्यमात्रमत्र परीक्ष्यताम् ॥ इति न्यायमञ्जर्यारम्भे अवितथं तथ्यं उररीचकार। सत्यमेवैतत् साहित्यशास्त्रविषयेऽपि; समस्तविषयाणां प्राचीनैरेव परामृष्टत्वात् । विचित्रमत्रैतत् यत्' धर्मसूरिः उक्तिवैचित्र्यं वैविध्यं चाप्यनादृत्य मल्लिनाथं यथातथमुपजीवति। अन्यान् कुक्षिभरित्वेन दूषयन् स्वग्रन्थस्य रामनायकत्वेन प्रत्यपादयत् । एकावलीं तरलं च अनुसृत्य साहित्यरत्नाकरं व्यरीरचत्। तथापि एकावल्याः तरलस्य च नामनी अप्यगृह्णन् अनूह्यं अनुपेक्षणीयं कृतज्ञतानाविष्करणदोषमाविश्चकार धर्मसुरिः। "कण्ठेषु चाद्य हृदयेषु च धार्यतां सा" इति मल्लिनाथस्योक्तिमाचरन् न केवल हृदये, कण्ठे मस्तके अपि तु पुस्तके च धृतवांस्तरलमेकावलीमपि साहित्यरत्नाकरकारः। परमत्रैतावद्वक्तुं शक्यते युक्तं च यत् मल्लिनाथादव्यवहितसमनन्तरभावित्वेन धर्मसूरिः तं महाभागं नामग्राहं न सस्मार इति ।

मम्मटादयोऽपि स्वपूर्ववर्तिनां ग्रन्थेभ्यः स्वकृतिषु तत्र तत्र उदाहरन्तः सन्तः प्राचीनान् नामग्राहं न स्मरन्तीति; मल्लिनाथश्च स्वव्याख्यानेषु विद्यानाथस्य प्रतापरुद्रीयात् लक्षणानि बहूनि उदाहरति परं विद्यानाथं न स्मरति इति चेत् सत्यमेव। परमियान् महान् भेदः मल्लिनाथधर्मसुरिणोः वर्तते– मल्लिनाथः केवलं स्वव्याख्योपोद्बलकतया लक्षणानि जग्राह, धर्मसूरिस्तु लक्षणग्रन्थे यथातथं अग्रहीत् इति। मल्लिनाथमहाशयस्य पदवाक्यप्रमाणपारावारपारीणस्याप्यात्मनो वरभणितीनां विदग्धविमृश्यत्वसूचकेन पद्येनानेनोपसंह्रियते :–

"जगति विविधविद्यासिद्धमुष्टिद्वयानां
　　वरभणितिपरीक्षा युज्यते सज्जनानाम् ।
तदिह मम निबन्धे दूषणं भूषणं वा
　　भवति यदि विदग्धैस्तद्धयवश्यं विमृश्यम् ॥



मल्लिनाथस्य सर्वपथीना–एको विमर्शः

–श्री आर्. श्रीहरिः

विदितमेवैतत्समेषां सुधियां यद् व्याकरणशास्त्रे अकृतावगाहानां भट्टिकाव्यस्थाः प्रयोगविशेषा दुर्बोधा इति। उक्तं च मल्लिनाथेन भट्टिकाव्यव्याख्याप्रारम्भे।

"व्याख्यागम्यमिदं काव्यमुत्सवः सुधियामलम्। हता दुर्मेधसश्चास्मिन् विद्वत्प्रियतया मया" इति। अत एवास्य काव्यस्य अध्ययनं सुकरं चिकीर्षवो बहवो व्याख्यातारो बहूनि व्याख्यानानि व्यरचयन्। मल्लिनाथसूरेः सर्वपथीना, जयमङ्गलस्य जयमङ्गला, नारायणविद्याविनोदस्य भट्टिचन्द्रिका,[1] रामानन्दस्य मुग्धबोधः, भरतमल्लस्य मुग्धबोधिनी, विद्यासागरस्य कलापदीपिका, कुमुदानन्दस्य सुबोधिनी चेतीमानि भट्टिकाव्यव्याख्यानेषु लब्धप्रचाराणि। अमीषु च समेषु व्याख्यानेषु जयमङ्गला, सर्वपथीना इत्येतद्व्याख्याद्वयमितराभ्यः सर्वाभ्योऽपि अधिकप्रचारे वर्तते।

मल्लिनाथः स्वीयव्याख्याने शब्दसिद्धिनिरूपणावसरे तत्र तत्र पूर्वव्याख्यातुर्जयमङ्गलस्य तथा अन्येषाञ्च व्याख्यातॄणां मत सप्रमाणं खण्डयन् स्वीयं व्याकरणवैदुष्यं प्रकटीकृतवान्। जयमङ्गलोक्ताः मल्लिनाथेन विमृष्टाश्च त्रिचतुरा व्याकरणविषयाः अत्र विविच्यन्ते।

1. उक्षांप्रचक्रुर्नगरस्य मार्गान्
ध्वजान्बबन्धुर्मुमुचुः खधूपान्।
दिशश्च पुष्पैश्चकरुर्विचित्रै
रथेषु राज्ञा निपुणा नियुक्ताः"
(III-5)

[1] अस्यैव 'भट्टिबोधिनी' इति नामान्तरं वर्तते।

अयं च श्लोकः श्रीरामस्य पट्टाभिषेकसम्भारसंविधानवर्णनावसरे वर्तते । 'उक्षाम्प्रचक्रुर्नगरस्य मार्गान्' इत्येतच्छ्लोकपादं जयमङ्गल एवं व्याचख्यौ–"नगरस्य मार्गान् पथः उक्षान् सेकवतः प्रचक्रुः उक्षणमुक्षा, गुरोश्च हलः इत्यकारः सा विद्यते येषामिति अर्शआदिभ्योऽच् । 'इजादेश्च गुरुमल' इत्यादिना आम्प्रत्यये प्रचक्रुरित्यनुप्रयोगो न घटते कृञ्चानुप्रयुज्यते इत्यनुशब्दस्य व्यवहितनिर्वृत्यर्थत्वात्" इति ।

अत्र माल्लीनाथ व्याख्या एवं वर्तते ।

"उक्षां प्रचक्रुः धूलिप्रशमनार्थं निषिषिञ्चुः उक्षसेचने लिट् इजादेश्च गुरुमतो इत्याम्प्रत्यये कृञोऽनुप्रयोगः । 'कृञ्चानुप्रयुज्यते लिटि' इत्यत्र अनुग्रहणस्य व्यवहितविपर्ययनिषेधार्थत्वात् व्यवहितप्रयोगस्य असाधुत्वेऽपि उक्षांचक्रुरित्यत्र अनुप्रयोगवदुपसर्गाणामपि ते प्राग्धातोरिति व्यवहितविपर्यस्तपूर्वप्रयोगनियमात् धात्वर्थाभिव्यञ्जकत्वादिना धात्वक्षरप्रायत्वाच्च प्रोपसर्गस्य न व्यवधायकत्वमिति नासाधुत्वम् । 'तं पातयां प्रथममास,' [1]'प्रभ्रंशयां यो नहुषश्चकार' [2]इत्यादावुपसर्गेतरस्य व्यवधानादसाधुत्वमेव, यत्तु जयमङ्गलाकारेण व्यवधानभयात् गुरोश्च हलः इत्यकाप्रत्यये ततो मत्वर्थीयाकारे च उक्षान् उक्षावतः सेकवतः इति शसन्तं पाठं परिकल्प्य व्याख्यातं तदतिप्रसिद्धपाठत्यागात् अत्यन्ताप्रसिद्धपाठकल्पनाच्च साहसमेवेत्युपेक्ष्यमेवेत्यलं प्रसक्तानुप्रसक्त्या"

एवं उक्षान् प्रचक्रुरिति जयमङ्गलेन स्वीकृतं शसन्तं पाठं मल्लिनाथः सयुक्तिखण्डयित्वा उक्षाम्प्रचक्रुरित्याम्प्रत्ययसहितस्यैव पाठस्य ग्राह्यतां न्यरूपयत् ।

२. "सुकृतं प्रियकारी त्वं कं रहस्युपतिष्ठसे
पुण्यकृच्चाटुकारस्ते किङ्करः सुरतेषु कः"

(v–68)

---

[1] रघुवंशम् 9–61 [2] रघुवंशम् 13–36

अत्र किङ्करशब्दस्य व्युत्पत्तिविषयेऽपि जयमङ्गलस्य मल्लिनाथस्य च मतभेदो वर्तते। जयमङ्गलः किम्पूर्वककृधातोः 'दिवाविभानिशाप्रभा' इत्यादि 'ट'–प्रत्ययविधायकसूत्रस्य अपवादीभूतस्य 'किंयतद्बहुषु कृञोऽज्विधानमित्यच्प्रत्ययविधायकस्य स्त्रीत्वैकविषयत्वं सुचयन् 'दिवानिशा' इति सूत्रेण 'ट' प्रत्ययेमैव 'किङ्कर' शब्दस्य रूपसिद्धिं निरूपयति। पश्यत तद्व्याख्यापङ्क्तीः

"किङ्करः दासः दिवा विभा इति टः। 'किं यत्तद्बहुषु कृञोऽज्विधानम् इति तत्स्त्रीविषये द्रष्टव्यम्"

किन्तु मल्लिनाथः किङ्करशब्दस्य 'दिवा विभा' इत्यादिसूत्रापवादभूतेन कियत्तद्बहुषु इत्यादिना अच्प्रयान्तत्वमेव समर्थयति। एवं 'कियत्तद्बहुषु' इति सूत्रस्य उदाहरणत्वेन दर्शितेषु किङ्करा, यत्करा इत्यादिषु अच्प्रत्ययान्तत्वसूचनार्थमुद्दिष्टया टाबन्ततया स्त्रीविषय, एव अज्विधानमिति जयमङ्गलेन यद्भावितं तद्भ्रान्तिमूलकमेवेति निर्णयति। एतत्समर्थकानि मल्लिनाथस्य वाक्यान्यत्र उद्ध्रियन्ते.

"किङ्कर" इत्यत्र हेत्वाद्यर्थविवक्षायां "कृञो हेतुताच्छील्यानुलोम्येषु" इत्यनेन ट एव जातिः किङ्करी इत्यादिङीबन्तप्रयोगदर्शनात्। तदविवक्षायां तु "दिवा विभानिशाप्रभाभास्" इत्यादिसूत्रप्राप्तटप्रत्ययबाधेन 'कियत्तद्बहुषु कृञोऽज्विधानम्' इत्यजेव किङ्करा, यत्करा इत्यादिटाबन्तप्रगोगदर्शनात्। यत्तु 'दिवा' आदिनैव टप्रत्ययः अज्विधानं तु स्त्रीमात्रविषयं इति जयमङ्गलाकारव्याख्यानं तद्वृत्तावच्प्रत्ययान्तत्वाभिव्यक्त्यर्थं किङ्करा, यत्करेति टाबन्तोदाहरणदर्शनाद्भ्रान्तमित्युपेक्ष्यम्।"

३. ततः प्रविव्राजयिषुः कुमार
मादिक्षदस्याभिगमं वनाय।
सौमित्रिसीतानुचरस्य राजा
सुमन्त्रनेत्रेण रथेन शोचन्।
(III, 9)

अत्र तृतीयपादे सौमित्रिसीतानुचरस्येति समस्तपदस्य विग्रहे कृतावपि जयमङ्गलस्य मल्लिनाथस्य चैकमत्यं न दृश्यते । सौमित्रिश्च सीता च सौमित्रिसीते अनुचरश्च अनुचरी च अनुचरौ सौमित्रिसीते अनुचरौ यस्य स इति जयमङ्गलोक्तो विग्रहः ।

मल्लिनाथस्तु सौमित्रिश्च सीता च सौमित्रिसीतम् सौमित्रिसीतं अनुचरं यस्य स इति विग्रहं प्रदर्शयन् स्वीयं मतमेवं समर्थितवान् ।

"सौमित्रिः सीता च सौमित्रिसीतं 'सर्वो द्वन्द्वो विभाषयैकवद्भवति इति वचनादेकवद्भावः अन्यथा अनुचरशब्दात् पचादिषु चरडिति टित्करणात् स्त्रियां ङीपि 'नद्यृतश्च' इति कप्प्रसङ्गात्, समासान्तानिष्यत्वेपि पुंवद्भावानुपपत्तेः" इति ।

४. सूतोऽपि गङ्गासलिलैः पवित्वा
सहाश्वमात्मानमनल्पमन्युः ।
ससीतयो राघवयोरधीयन्
श्वसन् कदुष्णं पुरमाविवेश ।।

(III, 18)

अत्र अधीयन्निति पदस्य प्रक्रियां जयमङ्गल एवं वदति "अधीयन् स्मरन् इक्स्मरणे इत्यस्य शतरि रूपम् यणादेशः" इति । मल्लिनाथस्तु रूपमिदं इयङादेशेन साधयति न तु यणादेशेन । जयमङ्गलानुसारं इक्स्मरणे इति धातोः यणादेशे यन्निति रूपे सिद्धे ततः 'अधि' इत्युपसर्गयोगेन आधियन्नित्येव रूपं भवेन्नतु अधीयन्निति । मल्लिनाथोक्तप्रक्रियायां इग्धातोः शतरि इयङादेशे इयन्निति रूपे ततः अधीत्युपसर्गयोगे सवर्णदीर्घे अधीयन्निति रूपं निर्बाधमेव । अतोऽत्र मल्लिनाथस्यैव मतं ग्राह्य भवति ।

एवं न केवलं जयमङ्गलोक्ता एव व्याकरणांशा अपितु इतरव्याख्यातृभिः प्रतिपादिताः शब्दशास्त्रविषया नैके स्वीयव्याख्याने युक्ततरं विमृष्टाः मल्लिनाथस्य निस्तुलं व्याकरणवैदुष्यं प्रकटयन्ति ।



Mallinatha and Nyaya-Vaisesika

By

E. R. Sreekrishna Sarma

Kolacala or Kolacarla Mallinatha, whose fame firmly rests on his most popular commentaries on the **Pancamahavyas,** was a keen student of all branches of learning of his time. His commentaries testify to this fact; Besides, a verse, found at the beginning of his commentaries, states that he has devoted several years to the study of various Sastras[1]. It is a pity that his contribution to various branches of learning has not been yet scientifically evaluted, although it is known that atleast two Ph. D. theses bearing on Mallinatha, have already been accepted for the award of the Degree.

In this short paper I propose to highlight Mallinatha's keen interest in the Nyaya-Vaisesika philosophy. This is not an evalution of his contribution to this branch of knowledge, for such a work cannot be done in a short paper like this. To our knowledge, Mallinatha has contributed one work to each branch, Vaisesika and Nyaya. Both are in the form of commentaries His Nyaya work called Niskantaka, a commentary on the **Tarkikaraksa** (TR) of Varadaraja, who is famous for his erudite commentary on the Nyayakusumanjali, is partly published. His work on Vaisesika is referred to by Mallinatha on pages 76, 139 and 142 of the printed ediion of the TR by the name Prasastapadabhasyanikasa-tika. This is yet to see the day's light. The editor of TR, Pt. Vindhyeswariprasad Dvivedi, had three Mss. before him for the purpose of editing the work with Mallinathas's commentary. Unfortunately none of them recorded Mallinatha's commentary after the 1st Pariccheda. But it seems almost certain that

[1] वाणीं काणभुजीमजीगणत् etc.

he had written his commentary on the remaining portions of TR also. For on p. 190 of TR, he says, 'all these will be clarified in the **Jatiparicchedа**, and again on p 207, this will be clarified at the end of the **nigraha** portion'. We need not also doubt the commentator Mallinatha's authorship of the Niskantaka, for he refers to his commentaries on the Pancamahakavyas therein[2].

Acknowledged characterstics of Mallinatha's commentary, नामूलं लिख्यते किंचित् नानपेक्षितमुच्यते are found in the **Niskantaka.** He does not clarify anything that which does not require clarification. He fills in the gap, wherever he finds the need, with appropriate explanation. A few examples may be cited taking recourse to स्थालीपुलाकन्याय. The **Mangala Sloka** of Varadaraja makes an obeisance to **Paramatman** who is qualified as विद्यानामादिकर्तारम् and निमित्तं जगतामपि. The auto-vrtti of Varadaraja does not explain this verse. But Mallinatha thinks it necessary to posit the two inferences, nearer to the heart of Naiyayikas, for establishing the existence of God.

एतेन वैदिकः संदर्भः केनचित् प्रणीतः सन्दर्भत्वाद् रामायणवत्,
तथाङ्कुरादिकं सर्वं सकर्तृकं कार्यत्वाद् घटवत् इति
चानुमानानद्वयाद् ईश्वरसिद्धिरिति सिद्धम् (P. 2)

Vyakarana and Kosa are Mallinatha's forte, as is evident from his commentaries on the Pancamahakavyas. He can not brush aside any point that requires an explanation to make it confirm to grammatical rules. The vrtti on the first karika of TR reads thus :

येषां प्रमाणादिनिग्रहस्थानान्तानां षोडशपदार्थानां
तत्त्वतोऽवधारणम्

---

[2] P. 39 (TR) स्फुटीकृतं चैतदस्माभिः पञ्चकाव्यादिटीकासु 'अलं महीपाल तव श्रमेण' त्यादौ.

Mallinatha becomes spontaneously sensitive to the expression षोडशपदार्थानाम् and offers two explanations to justify it grammatically.

> दिक् संख्ये संज्ञायामिति समासः सप्तर्षिवत् अन्यथा बहुत्वाद्यसिद्धेः । यद्वा पूरणप्रत्ययान्तोऽयं षोडशशब्दः तेषां च प्रत्येकमेव षोडशसंख्यापूरकत्वात् सर्वे षोडशाः । ते च ते पदार्थाश्चेति विग्रहः । (P. 3)

The sixteen categories listed by Aksapada in his Nyayasutras are quoted by Varadaraja[3]. He does not make any comment on their order of listing. Mallinatha, very briefly indicates the underlying logic in the order maintained by Aksapada and thus fills in the gap left out by Varadaraja :

> प्रमाणं विना प्रमेयाद्यसिद्धेः । विषयं विना प्रमाणाप्रवृत्तेः । असंदिग्धस्याप्रतिपित्सितत्वात् । संदिग्धस्यापि निष्प्रयोजनस्य अप्रतिपित्सितत्वात् । प्रतिपत्तेश्च दृष्टान्तमूलत्वात् । अवयवादिनियमस्य सिद्धान्तानुसारित्वात् । प्रमाकरणशरीर-निर्वर्तकाङ्गत्वात् प्रमाणानुग्राहकत्वात् । तत्फलत्वात् । तस्यापि कथासाध्यत्वे वादस्य तत्त्वनिर्णयफलत्वात् । जल्पस्योभयपक्षसाधनवत्त्वसाम्यात् । वितण्डायाः कथापारिशेष्यात् । निग्रहहेतुषु सर्वथा हेयत्वात् । दोषेषु लघुत्वात् फलत्वाच्चेति प्रमाणादिपदार्थोद्देशक्रमः ।

Mallinatha is fully aware of his obligationas a commentator to supplement the arguments of the author of the original and indicating the stand taken by him. Varadaraja defines प्रमाण as साधनाश्रययोरन्यतरत्वे सति प्रमाव्याप्तत्वम्.
The word **asraya** is to avoid the **avyapti** of the definition as God is **pramana**, though not a **sadhana**, being the substratum

[3] प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तअवयवतर्कनिर्णयवादजल्पवितण्डा-हेत्वाभासच्छलजातिनिग्रहस्थानानां तत्त्वज्ञानात् निःश्रेयसाधिगमः ।

of **prama.** Then he discusses the purpose of the word **sadhana** and finds it not very essential as **prameya** can be excluded from the realm of **pramana** by the word **vyaptatyam** in the definition. But he advances another argument to justify the word **sadhana** सुखादि प्रमेयव्यावर्तनेन वा तदनुप्रवेश इति न वैयर्थ्यम्. This means as pleasure and pain exists only when they are **prameya,** to avoid the applicability of the definition to them, the word sadhana is useful as a part of the definition. Here Mallinatha steps in and offers another more convincing argument.

> किं च ईश्वरप्रमया नित्यमर्वार्थगोचरया प्रमाव्याप्ते:
> तन्निरासेनार्थवत्त्वं द्रष्टव्यम् ।

Meaning that since God's knowledge is eternal and everything is its object all **pramevyas** are pervaded by **prama (prama-vyapta).** Therefore to avoid the overapplication of the definition to **prameya** as a whole, the word **sadhana** is to be maintained in the definition (p. 8).

It is well known that Varadaraja is a close follower of Vacaspati and Udayana. Mallinatha is also well-versed in Udayana's works So he adds some **masala** to the sentences of Varadaraja by adding some statements of Udayana. Varadaraja presents the view of the Bauddhas on **pramanya** quoting their statement :

प्रमाणमविसंवादिज्ञानमर्थक्रियास्थिति : and seeks to refute the condition **avisamvadi.** He argues that **visamvada** can not be established by **anumana** citing the example of silvernacre, etc., as for the Buddhists everything is a **vikalpa,** including the knowledge of the factors of **anumana** like **paksa** etc., and as a **vikalpa** is necessarily **visamvadi** no operation of **anumana** is possible. Here Mallinatha remembers the statement of Udayana made in the Kusumanjali and adds :

> किं चेत्थं प्रलपतो बौद्धस्य मूर्धनि भगवतापि बुद्धेन दुर्द्धर्षो
> महानयं वज्रपात: कृत इत्याह (P. 15)

Mallinatha's intense association with Alamkaras and Kavyas imparts a poetical quality to his statements. Varadaraja criticises the definition of **pramana** as **anubhuti** given by Prabhakara, pointing out his inconsistency in first accepting the knowledge emerging from the Vedas as self-valid and after excluding **smrti** from **pramana.** Here Mallinatha remarks :

तदेतत्तुरगाधिरूढस्य तुरगविस्मरणं यद् वेदप्रामाण्यसाधने प्रवृत्तस्य मीमांसागुरोः तत्प्रमाद इति

Mallinatha does not fail to correct Varadaraja politely when he finds that the latter uses words in violation of the law of logical economy. For example, Varadaraja while criticising the Bhatta view that knowledge is an object of inference states that it can be an object of mental perception since it is a special momentary quality of **Atman, (ksanikatma-visesa-guna).** Mallinatha remarks on this :

गुणग्रहणं स्फुटार्थम् गुणव्यतिरेकेण क्षणिकविशेषणमात्मन्य भावात्ः सामान्यविशेषान्त्यविशेषयोश्च क्षणिकपदेनैव निवृत्तेः ।

Mallinatha does not hesitate to explain what is not cared for by the author of the original. Varadaraja omits the Gautama sutra. प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि but fails to explain the logic lying under the particular order of enumeration. Mallinatha fills in the gap :

तत्र सर्वप्रमाणोपजीव्यत्वात् प्रत्यक्षस्य प्राथम्यं, तदितरप्रमाणोपजीव्यत्वात् प्रत्यक्षानन्तर्यमनुमानस्य पृथक्प्रामाण्यदार्ढ्यसूचनार्थमुपमानस्य शब्दात् प्राथम्यम्ः परिशेषाच्छब्दस्यान्ते निवेश इति । (P. 55)

Mallinatha finds fault with and ridicules a scholar, without mentioning the name, who took the expression लक्ष्यणस्य तथाभोवात् (p. 76) occuring in the Varadarajatika as

a quotation from Kirnavali and cites the correct passage as occuring in the Kirnavali. Here are his words :

अयमप्येक: किरणावलीग्रन्थ आत्मप्रकरणस्य इति कैश्चिदुत्तुण्ड-तुण्डैराख्यातं तथैव व्याख्यातं च । तदप्याकरापरिज्ञानवञ्चना-साहसविलास एवेत्यास्ताम् । (किरणावल्यां पृथिवीप्रकरणे 'केवलव्यविरेत्तिविशेष एव लक्षणम्' आचार्यवाचस्पतिटीकायां समानासमानजातीयव्यवच्छेदो लक्षणार्थः' ।

In the same way he does not spare those who thought that the view that darkness is a quality of infinitesimal particles of earth spread out in the air, was the view of the Prabhakaras (p. 133). He points out that according to the Prabhakaras, darkness is a **bhavabhava** and reminds us that here **abhava** should not be taken as a negative entity. In support of this he quotes Salikanatha : Mallinatha cannot resist his **nighantu vasana,** even while commenting upon, the Sastra texts. तदेतद् वार्तम् says Varadaraja. Mallinatha explains : वार्तं फल्गुनिः सारमययुक्तमिति यावत् । 'वार्तं फल्गुन्यरोगे च' इत्यमरः (p. 164)

In the same way the Vaiyakarana in him also raises his head every now and then.

Varadaraja states :

विस्तरस्तु आत्मतत्त्वविवेकपरिश्रमशालिनां सुगममेव ।

Mallinatha remarks :

शालिनामिति शेषे षष्ठी, न लोकेत्यादिना कृद्योगषष्ठया एव निषेधादिति ।

There are a very few cases in the commentaries on the **Panch-mahakavyas,** which indicate Mallinatha's assimilation of the Nyaya-Vaisesika tenets. Commenting on the verse 'ऐन्द्रमस्त्रमुपादाय' etc. (RV. 15.22) Mallinatha states यतोऽणनास्ति

स परमाणुरित्याहुः . On Uttaramegha 2.14 तस्यास्तीरे etc., Mallinatha criticises the view of an earlier commentator निरुक्तकार where he shows his erudition in the Nyaya-Vaisesika.

> निरुक्तकारस्तु त्वां तमेव स्मरामि इति योजयित्वा मेघे शैलत्वारोपमाचष्टे । तदसंगतम् । असद्व्यारारोपस्य (?) पुरोवर्तिन्यनुभवात्मकत्वेन स्मरतिशब्द प्रयोगानुपपत्तेः । शैलत्वभावनास्मृतिरित्यपि नोपपद्यते । भावनायाः स्मृतित्वे प्रमाणाभावात् । अनुभवायोगात् सादृश्योपन्यासस्य वैयर्थ्याच्च । विसदृशेऽपि सालग्रामे हरिभावनादर्शनादिति ।

The commentator Niruktakara is again criticised by Mallinatha on the commentary on Uttaramegha, 44, भित्वा सद्यः, etc. :-

> अत्र वायूनां स्पृश्यत्वेऽप्यमूर्तत्वेनालिङ्गनायोगादालिङ्ग्यन्त इत्यभिधानं यक्षस्योन्मत्तत्वात् प्रलपितमिति वदन् निरुक्तकारः स्वयमेवोन्मत्तप्रलापीत्युपेक्षणीयः ।

Commenting on Uttaramegha सा संन्यस्ताभरणम् etc., Mallinatha resorts to verification, while criticising a point raised by others: Some (probably the Niruktakara) stated that मत्सादृश्यं लिखन्ती represents the first stage of love called चक्षुः प्रीति. Mallinatha lashes out :

> चक्षुः प्रीतिर्भवेच्चित्रेऽप्यदृष्टचरदर्शनात् ।
> यथा मालविकारूपमग्निमित्रस्य पश्यतः ॥
> प्रोषितानां च भर्तॄणां क्व दृष्टादृष्टपूर्वता ।
> अथ तत्रापि सन्देहे स्वकलत्राणि पृच्छतु ॥
> किं भर्तृप्रत्यभिज्ञा स्यात् किं वैदेशिकभावना ।
> प्रवासादागते स्वस्मिन्नित्यलं कलहैर्वृथा ॥

Kalidasa uses the expression अनुमेयशोभि in verse 1.37 of the **Kumarasambhava.** This gives opportunity to Mallinatha to

Mallinatha and Kautilya's Arthasastra

By
K. Kunjunni Raja
Professor of Sanskrit (Retd.)
University of Madras, Madras.

Kalidasa's intimate acquaintance with Kautilya's **Artha sastra** has already been demonstrated by many scholars[1]. It is therefore only natural to assume that Mallinatha, the great commentator of his poems, justly famous for pointing out relevant authorities and for avoiding irrelevant details, would be giving apt quotations from Kautilya's **Arthasastra** wherever implied in the text. A careful examination of these quotations in comparision with the available critical edition,[2] may help to shed light on the text of the **Arthasastra**, available to Mallinatha and on the correct reading of some of the passages.

Mallinatha quotes from Kautilya's **Arthasastra** eleven times in his commentary on the **Raghuvamsa** and two or three times in his commentary on the **Kumarasambhava**. It is strange that by a detailed study of some of these quotations, two scholars[3] have arrived at two mutually conflicting, extreme, views. Dr. S. G Moghe thinks that Mallinatha had two copies of the manuscripts of the **Arthasastra** with two different versions, while Dr. Sankaranarayanan is of the view that Mallinatha did not possess a complete text of Kautilya's **Artnasastra**, but was quoting from secondhand sources like stray floating passages ascribed to Kautilya and transmitted by oral tradition. Hence it is necessary to study the quotations a fresh and examine the arguments adduced by the scholars and see whether an objective conclusion can be arrived at on the problem.

The following are the quotations from Kautilya, found in Mallinatha's commentary on the **Raghuvamsa**.

Mallinatha		**Kautilya**
1. क्रिया हि द्रव्यं विनयति नाद्रव्यमिति कौटिल्यः ।	III. 29.	1-5-4.
2. द्विविधो हि विनयः स्वाभाविकः कृत्रिमश्चेति कौटिल्यः ।	III. 35.	1-5-3.
